
माघमासः
वर्षम्–६८
चतुर्थोऽङ्कः
विक्रमाब्दः २०७३
युगाब्दः ५११८
५ फरवरी २०१७

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–








## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | भ्रष्टाचारोच्छेदो भूयात् | डॉ. राजेशकुमारगुप्तः | ५ |
| ५ | श्रद्धाञ्जलिः | म.म. देवर्षिकलानाथशास्त्री | ६ |
| ६ | भट्टमथुरानाथसाहित्ये सामाजिकसम्बन्धाः | डा. सुरेन्द्रकुमारशर्मा | ८ |
| ७ | ज्वालयतु रे ! दीपपंक्तिम् | डॉ. प्रशस्यमित्र शास्त्री | ९ |
| ८ | संस्कृत-समाचाराः | - | १० |
| ९ | नूतनकाव्यपृषताः | डॉ. हर्षदेवमाधवः | ११ |
| १० | व्यङ्ग्यपृषताः | डॉ. हर्षदेवमाधवः | १२ |
| ११ | कालिदासो, भूत्वाउदन्तोऽदन्तः | प्रो. ताराशंकर शर्मा | १३ |
| १२ | पुत्रिकासमीक्षा | देवर्षिकलानाथशास्त्री | १४ |
| १३ | प्रेरकप्रसङ्गशतकम् | मा. श्रीमती आराधना धर्माधिकारी | १७ |
| १४ | श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | १८ |
| १५ | हास्यकाव्यानि | जैन साध्वीशीलभद्राश्रीः | १९ |
| १६ | शब्दब्रह्मप्राप्तौ उपायविमर्शः | डॉ महेन्द्रशर्मा | २० |
| १७ | संस्कृतश्लोकान्त्याक्षरी-प्रतियोगितायाः आयोजनम् | चन्द्रप्रकाश शर्मा | २२ |
| १८ | श्री करणीचरितामृते वैयाकरणवैदुष्यम् | प्रद्युम्न शर्मा | २३ |
| १९ | वेदेषु वास्तुविद्यास्वरूपम् | मेघा शर्मा | २५ |
| २० | ज्योतिर्विज्ञाने सन्तति-वैविध्यम् | धीरजकुमारशर्मा | २८ |
| २१ | नारी-स्तम्भः | डा. राजेश्वरी भट्ट | ३० |
| २२ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**




।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका





**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः स्वः श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामाशर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता
ओ.पी. गोयल

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

माघेऽघौघनिवारणाय सुधियो गच्छन्ति गङ्गातटे,
मासेऽस्मिन् निवसन्ति चात्र सुखिनो ध्यायन्ति गङ्गां बुधाः।
दीनेभ्यो नवकम्बलानि बहवो यच्छन्ति तीर्थे शुभे,
यः सद्यः प्रददाति पुण्यमखिलं तं तीर्थराजं नुमः।।

## मासावतरणम्

शीताद् भीतिमुपागता हि जरठास्तिष्ठन्ति सूर्यातपे,
कम्पन्ते ननु चाङ्गकानि वयसामिच्छन्ति तेऽप्युष्णताम्।
जानुभ्यां निजगात्रभीतिमपरे रक्षन्ति वृद्धास्तथा,
आलिङ्गन्ति तथैव चातितरुणाः स्वीयां प्रियां प्रेमतः।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

माघमासः
वर्षम् 68
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2073
फरवरी, 2017
अङ्कः - 4
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# मुद्रासंकोचप्रभाव:

...✍ पं. प्यारेमोहनशर्मा

लोकतन्त्रे निर्वाचने बहुमतप्राप्तये सर्वाणि दलानि प्रयतन्ते। येन दलेन बहुमतमधिगतं तदेव दलं पञ्चवर्षाणि यावत् देशस्य शासनसिंहासनमलङ्करोति। सम्प्रति नरेन्द्रमोदीमहोदयस्य नेतृत्वे भारतीयजनता शासनं प्रचालयति। फरवरीमासे पञ्चसु राज्येषु निर्वाचनं सम्पत्स्यते। नरेन्द्रमोदीमहोदयो भ्रष्टाचार-मवरोद्धुं प्रचलितां मुद्रामवारोधयत्। मुद्रावरोधेन यद्यपि भ्रष्टमार्गेण यैर्धनमर्जितं तेषां सर्वं भ्रष्टाचरणं सम्मुखे समागतम्। परन्तु प्रचलितमुद्रावरोधेन सर्वत्र कोषकार्यालयेषु धनाभाव: सञ्जात: धनाभावेन लोकानां सर्वाणि कार्याण्यवरुद्धानि। ततश्च नवीनमुद्रायां द्विसहस्त्र-रूप्यकाणामेकैव मुद्रा कोष-कार्यालयेषु समागता। तेन सामान्यजनानां साधारणव्यापारिणां शाकविक्रेतृणां सर्वेषां कार्याणि प्राय: अवरुद्धानि, परन्तु पुनरपि सामान्या जनता मोदीमहोदयस्य कार्यं समर्थयति। सम्प्रति पञ्चसु राज्येषु यन् निर्वाचनं भविष्यति तत्र यदि भारतीयं जनतादलं बहुमतं प्राप्नोति तदा तु भारतीयजनतादलं स्वकीये लक्ष्ये साफल्यमवाप्स्यति अन्यथा तदीयदलं शासनकार्ये जनताया: सहयोगं न लप्स्यते।

2016 ख्रिष्टाब्दे भारतीया मुद्रा संकुचिता जाता। 2017 ख्रिष्टाब्दे निर्वाचनानि भविष्यन्ति। भारते तु प्रतिवर्षं निर्वाचनानि प्रचलन्ति। कस्मिन्नपि देशे एतावत्-शीघ्रकाले निर्वाचनं न जायते। 2017 ख्रिष्टाब्दं 2014 ख्रिष्टाब्दानन्तरं सर्वाधिकमहत्वपूर्णं निर्वाचनवर्षं विद्यते। मोदी द्वारा यन्नियमविरुद्धमर्जितं धनमासीत्, तत्तु सर्वथा विलोपितम्। एतेन कार्येण मोदीविरोधिन: आश्चर्ये निमग्ना:। पूर्वं 2014 वर्षे मोदीमहोदय: सर्वाणि दलानि पराजित्य भारतीयं जनतादलमेव प्रकाशयत्। विपक्षे नैकमपि दलं बहुमते समागतम्। सम्प्रति च पुन: प्रधानमन्त्रीरूपेण तथैवात्मानं प्रकाशयत्। मोदीमहोदय: इत्थमेव कार्यं सम्पादयति। अहोरात्रं सप्ताहं यावत् कार्ये संलग्नो जायते। स निरन्तरमेकघटनानन्तरमपराघटनाम् एक भाषणानन्तरमपरं भाषणम् आश्चर्योत्पावृदक-विचारेण परमाश्चर्योत्पादकं विचारं जनयति। तस्मै एष एव मार्ग: रोचते। सम्प्रति वार्तालापस्य समयो व्यतीत:। मुद्रासंकोचपरामर्शो नासीत् शोभन:। परन्तु निश्चयेन इदमेकं साहसिकं कार्यं विद्यते। एतेन कार्येण 2017 ख्रिष्टाब्दस्य महत् लक्ष्यं निर्धारितं जातम्। 2017 ख्रिष्टाब्दो निर्वाचनेन महत्वपूर्णो विद्यते। आश्चर्यमिदमेव यत् सम्प्रति प्रधानमन्त्रिरूपेऽपि मोदी महोदय एकाकी एवात्मानं तथैव प्रमाणयत्। मोदीमहोदयायेदमेव रोचते। चतुर्विंशतिहोरात्मके काले स कार्यं विदधाति। न च परिश्रान्तो जायते। स निरन्तरमेकघटनानन्तरमपरां घटनां, एकभाषणा-नन्तरमपरभाषणं प्रतिक्षणं परिवर्तनं कर्तुं विचारमग्नो जायते। केनापि सह वार्तां न करोति स्म इत: डा. मनमोहन सिंह:। मोदीमहोदय एतद्विपरीतं निरन्तरं भाषते। मुद्रासंकोच: साहसपूर्णो निर्णयोऽविद्यत। मुद्रासंकोचस्य सफलताया: परीक्षा पञ्चसु राज्येषु निर्वाचने सफलता-असफलताद्वारैव भविष्यति। इदं कार्यं प्रधानमन्त्रिणो व्यक्तित्वेन पूर्णरूपेण सम्बद्धोऽजायत। पञ्चसु राज्येषु सर्वाधिकं महत्वपूर्णं निर्वाचनमुत्तर-प्रदेशस्य निर्वाचनं विद्यते। अद्यापि उत्तरप्रदेश: राष्ट्रीयां राजनीतिं निश्चिनोति। मोदीमहोदयस्य आत्मनो राजनैतिकं भविष्यत्कालं सुरक्षितं विधातुं उत्तरप्रदेशे निर्वाचने सफलतावाप्तौ पूर्णरूपेण निर्भरो विद्यते। उत्तरप्रदेश एव स्वतन्त्ररूपेण शक्तिस्रोतो विद्यते।

उत्तरप्रदेशस्य 73 त्रिसप्तति सांसदा एव लोकसभायां मोदीमहोदयस्य सर्वकारस्य सुदृढाः स्तम्भाः विद्यन्ते। एतदभावे मोदीमहोदयो निर्बलगठबन्धनस्य सर्वकारस्य नेता अभविष्यत्। अधुनेदमेवास्य कर्मभूमिर्विद्यते। वाराणसीतो निर्वाचने साफल्य-मधिगतम्। भारतीय-जनतादलस्य सूर्योदय एव 1990 वर्षे उत्तरप्रदेशा-देवाजायत। ततो राममन्दिरं दलस्यास्याधारभूत-मजायत। ततो भाजपा अस्तित्वाय निरन्तरं संघर्षरताभूत्। मोदी-अमितशाहौ सम्यक् जानीतः यत् उत्तरप्रदेशे निर्वाचने यदि बहुमतं प्राप्स्यति भारतीयं जनतादलं तदा तु 2019 तमे वर्षे पञ्चवर्षाणां कृते पुनरेकः कार्यकालः प्राप्स्यते।

मुद्रासंकोचस्य प्रभावो मोदी महोदयस्य गृहराज्ये गुर्जरप्रान्तेऽपि संलक्ष्यते। एतेन गुर्जर-राज्यस्य मध्यमवर्गीया जनाः व्यापारिणः लघूद्योगनिरता जनाः कष्टमनुभवन्ति। मुद्राभावे न हि ते किमपि कार्यं कर्तुं शक्नुवन्ति। अतस्तेषां मनसि आक्रोशो विद्यते। यद्यपि हिन्दुत्वं शक्तिशालिकारक-रूपेण तत्र सम्प्रत्यपि विद्यते। नहि हिन्दुत्वस्योपेक्षा कर्तुं शक्यते। अन्येभ्यो दलेभ्योऽपि निर्वाचनमिदं भविष्यत् निर्माता विद्यते। तत्र कांग्रेसदलाय तु आक्सीजनस्यावश्यकता विद्यते। अतः प्रतीयते अनुमीयते च यत् भारतीयजनतादलमेव पुनः स्वमाधिपत्यं स्थापयिष्यति। अन्ते च सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःख भाग् भवेत्।

# भ्रष्टाचारोच्छेदो भूयात्

❑ डॉ. राजेशकुमारगुप्तः


दौर्भाग्यं देशस्यास्माकं, भ्रष्टाचारो व्याप्तो जातः।
नष्टा तस्माद् भव्या भूतिर्भ्रष्टाचारोच्छेदो भूयात्।। १।।
वित्तार्थं ये स्वार्थे लिप्ता, भ्रष्टा धूर्ता दुष्टा मूढाः।
कुर्वन्त्येतत् कार्यं निन्द्यं, भ्रष्टाचारोच्छेदो भूयात्।। २।।
भ्रष्टाचारं शिष्टाचारं, मत्वा मोदन्ते नेतारः।
राष्ट्रे लोकास्त्रस्ता यस्माद्, भ्रष्टाचारोच्छेदो भूयात्।। ३।।
भीता भूमिर्भ्रष्टाचाराद्, भृत्यैर्धर्माद्धीनैर्दुष्टैः।
सौख्याद् हीने राष्ट्रे मेऽतो, भ्रष्टाचारोच्छेदो भूयात्।। ४।।
ज्ञाने धर्मे चार्थे मोक्षे विद्वद्वर्यैर्मान्ये पूज्ये।
संसारेऽस्मिन् राष्ट्रे भव्ये, भ्रष्टाचारोच्छेदो भूयात्।। ५।।
शक्तिः क्षीणा कान्तिर्जीर्णा, लुप्ता शान्तिर्भ्रान्तिर्व्याप्ता।
यस्माद् दिव्ये राष्ट्रेऽस्मिन् स, भ्रष्टाचारोच्छेदो भूयात्।। ६।।
छात्रा योग्या वृत्त्या हीना, नैराश्ये ते प्राणान् त्यक्त्वा।
दुःखान्मुक्ता राज्ये भ्रष्टे, भ्रष्टाचारोच्छेदो भूयात्।। ७।।
न्याय्यं प्राप्तुं ग्रामे ग्रामे, दीना हीनास्तीर्थं मत्वा।
सीदन्त्यस्मिन् राष्ट्रे भ्रष्टे, भ्रष्टाचारोच्छेदो भूयात्।। ८।।
नारी भीता शून्ये मार्गे, चारित्र्ये भ्रष्टा आचार्याः।
विद्याशून्याः शिष्या यस्माद्, भ्रष्टाचारोच्छेदो भूयात्।। ९।।
पुण्यं कार्यं त्यक्त्वा राष्ट्रे, पापाचारे भ्रष्टाचारे।
सौख्यं लब्धुं भृत्या भ्रान्ता, भ्रष्टाचारोच्छेदो भूयात्।। १०।।
आविर्भूयात् कृष्णो रामो, दैत्यान् भ्रष्टान् हन्तुं शीघ्रम्।
स्वेच्छाचारं पापं हर्तुं, भ्रष्टाचारोच्छेदो भूयात्।। ११।।
आर्यावर्त्ते भ्रष्टं तन्त्रं, नष्टं कर्तुं क्रान्तिर्भूयात्।
सौभाग्यं सौख्यं स्याद् यस्माद्, भ्रष्टाचारोच्छेदो भूयात्।। १२।।
भ्रष्टा नीतिर्यस्मिन् राष्ट्रे, शान्तिस्वप्नो दूरं तस्मिन्।
शुद्धा निष्पक्षा नीतिः स्याद्, भ्रष्टाचारोच्छेदो भूयात्।। १३।।
भ्रष्टं तन्त्रं रोद्धुं राष्ट्रे, यत्नः कार्योऽस्माभिर्नित्यम्।
सम्माने वृद्धिः स्यात् तस्माद्, भ्रष्टाचारोच्छेदो भूयात्।। १४।।
धीमद्भिः श्रीमद्भिः शान्तैः, श्रीसंवृद्धिः साध्या श्रेष्ठा।
सच्छीले सिद्धिं सम्प्राप्तुं, भ्रष्टाचारोच्छेदो भूयात्।। १५।।

**संस्कृत-विभागः**
**केन्द्रीय-विद्यालयः क्र.2, सैन्यक्षेत्रं, जयपुरम्-12**

श्रद्धाञ्जलिः

# अजरामराः श्रीराधासर्वेश्वरशरणदेवाचार्याः

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः



वैष्णवाचार्याणामग्रपङ्क्तौ पूजनीयस्य सुदर्शनावतारस्य श्रीनिम्बार्काचार्यस्य प्रधानपीठे सुमहते कालाय प्रायः पादोनशताब्दीपर्यन्तं सुविमलयशोधवलिम्ना सह पीठाधीश्वरपदं विभूषितवता श्रीजीमहाराजेतिनाम्ना सुविदितेन श्रीराधासर्वेश्वरशरणदेवाचार्येण स्वकीया सांसारिकलीला मकरसंक्रमणकाले सं. 2073 वर्षे माघकृष्ण द्वितीयायां (14 जनवरी 2017) समुपसंहृता, सालोक्यमुक्तिश्च प्राप्तेति ज्ञातं समस्तदेशवासिभिः। 88 वर्षवयस्का आचार्यपादा बहोः कालदस्वस्य आसन् किन्तु सूर्यस्योत्तरायणकाले भौतिकीं तनुमत्यजन्निति सुतरां सनातनधर्मानुरूपाऽऽचारक्रिया।

10 मई 1929 दिने राजस्थानभुवि श्रीरामनाथशर्मणः पुत्रत्वेन सलेमाबादे (अजमेरजनपदे) श्रीमतां जनिरभूत्। तदानीम् ''उत्तमचन्द्रशर्म'' नामभिरेतैः सकलशास्त्राध्ययनं विधाय, संस्कृत-ब्रजभाषा-हिन्दीप्रभृतिषु काव्यसर्जनाभ्यासमर्जयित्वा निम्बार्काचार्यपीठाधीशानां श्रीबालकृष्णशरणदेवाचार्याणां शिष्यत्वमधिगतं, वैष्णवी दीक्षा चाऽधिगता। आश्रमपरिवर्तनानुरूपं ''राधासर्वेश्वरशरणे'' ति नाम चाऽधिगतम्। 7 जुलाई 1940 दिवसे दीक्षा प्राप्ता, युवराजपदं चाधिष्ठितम्, 5 जून 1943 दिवसे प्रधानपीठमुत्तराधिकारित्वेन समलङ्कृतम्, तदारभ्य निरन्तरं पादोनशताब्दीमये काले तैर्विश्वस्मिन् विश्वे निम्बार्काचार्यध्वज उत्तोलितः, प्रवचनादि विहितं, षष्टितोऽप्यधिक संख्यायां संस्कृत-हिन्दी- प्रभृतिभाषासु ग्रन्था विलिखिताः, सुललितभक्तिगीतयो निबद्धाः। एतेषां कृतित्वमवलम्ब्यानेके शोधार्थिनः शोधोपाधीन् प्राप्तवन्तः।

''भारतकतल्पवृक्ष'' ''भारतवीरगौरव'' ''भारतीगौरव'' प्रभृतयो ग्रन्था सूचयन्ति यदेतैर्वैष्णवसम्प्रदायानुवर्ति साहित्यं तु विपुले परिमाणे विलिखितमेव, राष्ट्रभक्तिसाहित्यमपि सुभृशं सृष्टम्। निम्बार्कजगद्गुरोस्त्रिचत्वारिंशत्तमैरुत्तराधिकारिभिः (43 पीठाधीशैः) श्रीराधासर्वेश्वरशरणदेवाचार्यैः सलेमाबादस्थप्रधानपीठपरिसरे शिक्षाप्रसारस्य सुमहत् कार्यमनुष्ठितम्। संस्कृतविद्यालयः, वेदपाठशाला, प्रवचनालयः, अतिथिशाला इत्यादीनि प्रतिष्ठानानि विद्याप्रसारं चक्रुः।

श्रीनिम्बार्काचार्याणां 5101 तमे वर्षोत्सवे एभिः सुमहान् विश्व-विदितश्चिरस्मरणीयः सारस्वतमहोत्सवः 20 नवम्बरतः 22 नवम्बरपर्यन्तं 2004 ई. वर्षे

समायोजितो यत्र समस्तादपि भारतदेशात् पीठाधीशा, आचार्या विद्वांसश्च निम्बार्कपीठे समवायन्। एवं विधान् गतिविधीन् स्मारयन्तो बहवो ग्रन्थाः, स्मारिकाश्च पूज्यानामेतेषां प्रोत्साहनवशात् प्राकाशिषत। प्रतिवर्षं विद्वत्सम्माननं, भक्त्युत्सवानामायोजनं, ग्रन्थप्रकाश-नादिकं चैतेषां प्रेरणया प्रधानपीठे, अन्यासु शाखासु च समायोज्यते स्म। एतेषां जीवनं कृतित्वं च विवेचयन्नेको ग्रन्थोऽपि प्राकाशि।

एतेषां प्रेरणया निम्बार्कसम्प्रदायसिद्धान्तानां प्रसाराय बहुभिर्मनीषिभिः संस्कृते, हिन्द्याम्, आङ्गल-भाषायां च ग्रन्था व्यलेखिषत, प्रधानपीठेनान्यैश्च पीठैः प्रकाशकादिभिश्च प्राकाशिषत। भारतीपत्रिकाया एते संरक्षका आसन्। संस्कृतवैदुष्याय राष्ट्रपतिसम्मानोऽ-प्येभिरधिगतोऽभूत्।

राजस्थानधराया इदं गौरवं यद् देशस्य प्रधान-वैष्णवसम्प्रदायेषु द्वयोः प्रमुखसम्प्रदाययोः प्रधानपीठ-द्वयमस्यामेव धरायां प्रतिष्ठितमस्ति। निम्बार्काचार्य-प्रधानपीठं सलेमाबादोपनगरे (अजमेर जनपदे सम्भागे च) स्थितमस्ति, वल्लभाचार्यप्रधानपीठं नाथद्वारोपनगरे (राजसमन्दजनपदे उदयपुरसम्भागे) स्थितमस्तीति बहुधाऽहं निवेदयामि।

भारतीपरिवारः श्रीराधासर्वेश्वरशरणदेवाचार्याणां स्मृतये सविनयं श्रद्धार्घ्यं समर्पयति। 44 तमपीठाधीश-पदाय श्रीश्यामशरणदेवाचार्याश्चं मनोनीता आसन्नाचार्य-पादैरिति सातमैव स्याद् वैष्णवैः।

गोलोकमारूढवतां श्रीराधासर्वेश्वरशरणदेवाचार्याणां स्मृतये श्रद्धार्घ्यमर्पयितुं मया पद्यसप्तकमिदमुपह्रियते-

**द्वैताद्वैतमयीं हि दर्शनगिरं, सन्धार्य, सौदर्शनीं**
**यः प्रख्यापितवान् स्वकीर्तिममलां निम्बार्कसूरिः प्रभुः।**
**तस्यैव ध्वजमुद्वहन् बुधमणिः श्रीजीति सम्पूजितो**
**राजस्थानभुवं व्यभूषयदसौ राधाऽऽद्यसर्वेश्वरः।।**

**श्रीवृन्दावनधाम्नि संस्कृतगिरः शिक्षां प्रकृष्टां दधौ**
**हिन्द्या च व्रजभाषया सुरगिरा ग्रन्थानगुम्फद् बहून्।**
**उत्कृष्टः कवि-गीतकारशिखरो वक्तोपदेष्टा तथा**
**विद्वद्वृन्द शिखामणिः स्मृतिपथे तिष्ठेत् सहस्त्रं समाः।।**

**निम्बादित्यमठे हि निर्जरगिरो विद्यालयं सन्दधत्**
**वेदाध्यापनकर्मणे रचितवान् यः पाठशालामपि।**
**इत्थं पाठनकर्मणे प्रतिदिनं शालात्रयं धारयत्**
**यः संवर्धितवान् प्रदेशभुवि तां शिक्षामयीं सम्पदम्।।**

**ग्रन्थो ''भारतकल्पवृक्ष'' महितस्तद् ''भारतीगौरवम्''**
**सार्धं ''भारतवीरगौरव'' मयं योऽवाऽसृजत् पुस्तकम्।**
**देशस्याऽस्य हि गौरवं बहुलयन् आचार्यचूडामणिः**
**प्रष्ठां राष्ट्रविचारणां स्वकृतिभिः संवर्धयामास सः।।**

**राधामाधवयोर्विलास-रसभृद्-वाग्गुम्फसन्दोहिभि-**
**र्गीतैः काव्यपदैश्च निर्जरगिरो हिन्द्याश्च शृङ्गारणाम्।**
**योऽकार्षीन्निजभक्तिमार्गमहितैर्ग्रन्थैरबध्नान्मनो**
**राजस्थानधराभुवां हि सुधियां भक्तप्रजायास्तथा।।**

**श्रीनिम्बार्कजगद्गुरोर्जनितिथेर्या पञ्चसाहस्त्रिकी**
**तस्या एकशतोत्तरे खलु महे सद्धर्मसम्मेलनम्।**
**संयोज्याऽखिलभारतीयसुधियः सर्वे समाकारिता**
**राज्यस्यास्य च भारतस्य च यशो येनाऽभवत् ख्यापितम्।।**

**सलेमाबादाख्ये प्रमुखगुरुपीठे स्थितवते**
**प्रभून् श्रीनिम्बार्कान् विबुधसमुदाये प्रथयते।**
**नमो राधासर्वेश्वरशरणदेवाय सततं**
**हृदब्जेष्वस्माकं सरलहृदयत्वात् स्थितिमते।।**

# भट्टमथुरानाथसाहित्ये सामाजिकसम्बन्धाः

❑ डा. सुरेन्द्रकुमारशर्मा

भट्टमथुरानाथस्य कथासाहित्ये सामाजिक-सम्बन्धानां चारु चित्रणं वर्तते।

**अनादृता** इत्यस्यां कथायामपि समाजे महिलानां मिथो व्यवहारे अमानवीयाचरणानां चित्रणं कृत्वा कौटुम्बिकेषु सामाजिकसम्बन्धगतं सौमनस्यं कामयमानः कथाकारः सामाजिकसम्बन्धेषु वैषम्यं प्रति जनचेतनां जागरयति। अनादृतां लतिकां प्रति रामकृष्णस्य सद्व्यवहारस्य विरुद्धं प्रबल आसीत् मानदण्डः। भीता लतिका ज्येष्ठपितुः सत्यव्यापारसूचनामपि दातुं नाशक्नोत्। महिलां प्रति महिलाया दुर्भावनायाः पटाक्षेपस्तदा भवति यदा माता स्वयं पाषाणकुण्डिकां भङ्क्त्वा बालिकां प्रति चिल्लति-

अस्यामेव कथायां दयनीयां प्रति तत्परया कृतः पश्चात्तापोऽपि सामाजिकसम्बन्धानां मूले निहितां मानवीयभावनां निदर्शयति। मानववादिविचाराणां प्रभावेणैव सामाजिकतायाः स्थैर्यं समाजे वेविद्यते। नारीं प्रति सहृदयताया भावस्तदीयकथने स्फुटमभिव्यक्त-स्तथैव तस्या दयनीयाया अपि मनोभावः स्वशिशून् प्रति सहजानुरागश्चापि मानवीयदृष्ट्या सहजवात्सल्येन परिपूर्णाः सन्ति।

क्वचित् सामाजिकसम्बन्धेषु विशृङ्खलतायाश्चित्रण-मपि भट्टमहाभागाः कुर्वन्ति। यथा ज्येष्ठमातुर्लतिकां प्रति विधीयमाने व्यवहारे दरीदृश्यते-

''ज्येष्ठमातुर्भीषणमूर्तिं भावयन्त्या लतिकाया गृहप्रवेशार्थं न प्राचलतां पादौ। शेषे किञ्च मनसि कृत्वा अतिनिभृतं सा गृहं प्राविशत्। कतिपयक्षणैरेव लतिका प्राणपणेन धावन्ती गृहाद्बहिरभूत्। द्वारपर्यन्तं घोरगर्जनां कुर्वन् कश्चित्ताम् अनुदधाव। तदनन्तरं तु सशब्दं द्वारकपाटौ बद्धावभूताम्। शृङ्खला चायोज्यत। ऊर्ध्वश्वासं धावन्त्या लतिकया नैतत्सर्वमज्ञायत।''

क्षत्रियशोणितमित्याख्यायां कथायामपि गृहस्थ-जीवने समुत्पन्नवैषम्यैर्ग्रस्तः कथानायकः स्वकुटुम्बिनः प्रति संवेदनशीलश्चित्रितस्तेन समाजे मानवीयाभावनानां उदात्तता परिलक्षिता भवति। द्रष्टव्यमस्ति विषयेऽस्मिन् विहितं वर्णनमित्थम्-

''शिरसि जाज्वल्यमानज्येष्ठस्य प्रचण्डश्च रश्मिर्वषति स्म वह्निं, किन्तु हतभागिनीं जननीं रोगशीर्णां भगिनीमसह्यानि तत्कष्टानि च सञ्चिन्त्य वाष्पः प्रास्रवत्। ममन्थ च घोरा वेदना मे हृदयम्।''

लोककल्याणविषयकचिन्तनेन सह समाज-कल्याणास्य कुटुम्बकल्याणाय वापि तदानीन्तनमानवानां चेतसि प्रभूतं भवति स्म चिन्तनम्। क्षत्रियशोणितम् इत्यस्याः कथाया द्वितीयभागे अङ्गरक्षकवेषधारी युवकः प्रथममेदिथायाः विषये चिन्तयति किन्तु कालिदासीय-सूक्तिवचनेन उद्बुद्धोऽसौ विषयेन विहाय स्वीयं यदात्मचिन्तनं प्रास्तौत् तद्वस्तुतः कुटुम्बस्य समाजस्य राष्ट्रस्य च विषये तात्कालिकमानवस्य आदर्शचरित्र-स्योदाहरणमेवोपस्थापयति प्रकारान्तरेण।

**प्राचार्यः**
**श्री दादूआचार्यसंस्कृतमहाविद्यालयः, जयपुर।**

# ज्वालयतु रे ! दीपपंक्तिम्

❑ डॉ. प्रशस्यमित्र शास्त्री
साहित्य-अकादमी एवं राष्ट्रपतिसम्मानप्राप्तः

दीपकेनैकेन कृपया
ज्वालयतु रे ! दीपपंक्तिम्।

राष्ट्ररक्षार्थं हि सततम्
सैनिका नः विगतनिद्राः,
सज्जिताः सीमाप्रदेशे
सर्वथा सन्नद्ध-मुद्राः,
देश-प्रेमरतस्तदर्थम्
वाचयस्व सदा प्रशस्तिम्।
ज्वालयतु रे ! दीपपंक्तिम्।। १।।

मूढता-दीनता-जडता
प्रतिदिनं वर्धते देशे,
ज्ञानहीनजनास्तु धूर्त्ताः
निःसृताः खलु साधुवेशे
ज्ञान-ज्योतिष उद्भवार्थम्
नाशयतु तामिस्रशक्तिम्।
ज्वालयतु रे ! दीपपंक्तिम्।। २।।

राजनीतिरियं सखे ! यदि
वर्त्तते गणिकेव दुष्टा,
नैव विश्वासः सतामिह
धारणेयं हृदि निविष्टा
कण्टकाकीर्णेऽथ मार्गे
प्रकटयसि किं स्वाऽनुरक्तिम्।
ज्वालयतु रे ! दीपपंक्तिम्।। ३।।

भ्रष्टमाचरणं जनेषु
वर्धते तदु महारोगः,
जाति-वर्ग-विशेषवादः
वर्त्तते ननु महाशोकः।
रोग-शोक-निवारणार्थम्
चिन्तयतु काञ्चिदपि युक्तिम्।
ज्वालयतु रे ! दीपपंक्तिम्।। ४।।

शोषिताश्च बुभुक्षिताश्च
वस्त्रहीनजना अनेके,
पर्यटन्ति विभिन्नपथिषु
चेतनावन्तः स्वदेशे,
जडे पाषाणे परं त्वम्
दर्शयसि किं वृथा भक्तिम्।
ज्वालयतु रे ! दीपपंक्तिम्।। ५।।

लोकतन्त्रमिदं विचित्रम्
कोऽपि ध्यायति न हि दरिद्रान्,
राजनेतारस्तु सततम्
साधयन्ति सदा समृद्धान्,
सत्यनिष्ठा-विरहितेभ्यः
दापयिष्यति को विमुक्तिम्।
ज्वालयतु रे ! दीपपंक्तिम्।। ६।।

मातरं पितरं गुरुं वा
सेवते बहु श्रद्धया कः ?
संस्कृतं वेदोपनिषदम्
पठति कः श्रद्धाऽभिभूतः ?
उत्तरं प्राप्तुं नियोजय
नाम्नि मे प्रथमा विभक्तिम्।
ज्वालयतु रे ! दीपपंक्तिम्।। ७।।

रायबरेली (उ.प्र.)

## संस्कृत-समाचाराः

संस्कृतभाषायाःप्रचारमाध्यमेन भारतं विश्वगुरुत्वं कर्तुं प्रयतमानायाः ''संस्कृतभारती'' संस्थायाः अखिल-भारतीयम् अधिवेशनम्, उडुपी, कर्नाटके जनवरीमासस्य 6-8 दिनांकपर्यन्तं संजातम्।

एतस्य अधिवेशनस्य ''संस्कृतभारतम्, समर्थभारतम्'' इति ध्येयवाक्यम् आसीत् अधिवेशनेऽस्मिन् भारतस्य सर्वेभ्यः राज्येभ्यः द्विसहस्राधिकप्रतिनिधयः समागताः। श्रीकृष्णमठस्य राजांगणे लोकसभा-अध्यक्षायाः माननीयायाः सुमित्रामहाजन-महोदयायाः उपस्थितौ पेजावरस्वामिनां श्रीमतां विश्वेशस्वामिनां सान्निध्ये च अधिवेशनस्य उद्घाटन- कार्यक्रमः संजातः। अस्मिन् अधिवेशने केन्द्रीय-मानवसंसाधनविकासमंत्रिणः माननीयः श्रीप्रकाश-जावडेकर-महोदयाः स्वकीयाविचारान् प्रकटितवन्तः। संस्कृतभारत्याः कार्याणां समीक्षा तथा च भाविकार्य-योजनायाः चर्चा संजाता। विज्ञानप्रदर्शिन्या सह संस्कृत माध्यमेन भव्यानां सांस्कृतिककार्यक्रमाणामायोजनमपि अस्मिन् अधिवेशने जातम्। अधिवेशने संस्कृतभारत्याः अखिल-भारतीय-कार्यकारण्याः अपि घोषणा जाता।

**अखिल-भारतीय-अध्यक्षः श्रीभक्तवत्सलः शर्मा, प्राचार्यः, सनातन-धर्म-केन्द्रीय-आदर्श-संस्कृत-महाविद्यालयः, ऊना, हिमाचल-प्रदेशः।**

**महामन्त्री - श्री श्रीशः देवपुजारी, पूर्णकालिकः, केन्द्रं-लखनऊ, उत्तरप्रदेशः।**

**संघटन-मन्त्री - श्री दिनेशः कामतः, केन्द्रं-देहली।**

**कोषप्रमुखः - श्री प्रदीपः गोलः, उद्योगपतिः, देहली।**

**सदस्याः 1. श्रीचान्दकिरणः सलूजा, सेवानिवृत्तः प्राध्यापकः, देहली। 2. श्रीगोपबन्धुः मिश्रः, संस्कृत-विभागाध्यक्षः, बनारस-हिन्दू-विश्वविद्यालयः, काशी। 3. श्रीएच.आर. विश्वासः, पूर्णकालिकः, केन्द्रं-मङ्गलूरू, कर्णाटकम्। 4. श्रीनन्दकुमारः, पूर्ण-कालिकः, केन्द्रं-कोडङ्गलूर, केरलम्। 5. श्रीमती जाह्नवी शुक्लः, सेवानिवृत्ता शिक्षिका, सिद्धपुरं, गुजरातम्। 6. श्रीरामकृष्णःभटः, पूर्णकालिकः केन्द्रं-धारवाडं, कर्णाटकम्। 7. श्रीसत्यनारायणःभट्टः, पूर्णकालिकः, केन्द्रं-बेङ्गलूरु, कर्णाटकम्।**

**विशेष-निमन्त्रित-सदस्यः- श्रीचमूकृष्णशास्त्री, पूर्णकालिकः, केन्द्रं-देहली।**

राजस्थानस्य 103 प्रतिनिधयः अधिवेशनेभागं गृहितवन्तः। संस्कृतभारत्याः जयपुरप्रान्तस्य अध्यक्षरूपेण सेवानिवृतप्रशासनिकाधिकारिण श्रीहरिशंकरभारद्वाज-महोदयानां नाम्नः घोषणा अभवत्। सर्वे प्रतिनिधयः नवोत्साहं संप्राप्य स्वकार्यक्षेत्रम् आगताः।

## 'ज्योतिषशास्त्रे द्विदिनसीमा ''श्री'' राष्ट्रियसम्मेलनम्'




जयपुरस्थ-अस्थासांस्कृतिसंस्थया दिल्लीस्थ-राष्ट्रिय संस्कृतसंस्थानस्य संयुक्तत्त्वावधाने सप्तदशोत्तर-द्विसहस्रख्रिष्टाब्ददे जनवरीमासस्य सप्तमाष्टमदिनांकयोः द्विदिवसीयम् अखिलभारतीयज्योतिषसम्मेलनं समायोजितम्। सम्मेलनेऽस्मिन् उत्तराखण्डदिल्ली-भोपालादिस्थानेभ्यः पंचाशत्संख्याकल्पाः विद्वांसः शोधच्छात्राः समागताः। राजस्थानविश्वविद्यालयस्य देरा श्रीशिक्षकसभागारे समायोजितेऽस्मिन् कार्यक्रमे मुख्यातिथिरूपेण राजस्थानमहिला-आयोगस्य अध्यक्षया श्रीमत्यासुमनमहोदयया प्रोक्तं यत् ज्योतिषं नामास्माकं भारतीयानां हृदये सारस्वतं स्फुरणशीलतत्त्वमास्ते। विशिष्टातिथित्वेन समुपस्थितैः भारतीयप्राशसनिकसेवा- संयुक्तैः श्रीचन्द्रशेखरमूथामहोदयैः भारतस्य ज्ञानविज्ञानक्षेत्रे योगदानं व्याख्यातम्। कार्यक्रमस्याध्यक्षैः राष्ट्रपति सम्मानितैः देवर्षिकलानाथशास्त्रिभिः कथितं यत् साम्प्रतं भारतीयभाषाणां शास्त्राणां च मूलं विस्मर्यतेऽस्माभिः अतः तत्संरक्षणाय सततं यतनीयम्। अस्मिन् अवसरे 50 संख्याकानि शोधपत्राणि प्रस्तुतानि विद्वाद्भिः शोधार्थिभिश्च। समापनसमारोहे राकेशर्माणः, पदमाकरशर्माण इत्याख्याः पत्रकाराः तथा च पं. रामपालशास्त्रिणः, प्रो. भास्करशर्माणः इत्याख्याः ज्योतिषविद्वांसः सम्मानिताः। संस्थायाः अध्यक्षेण श्री बी.एम. शर्मणा समागतानाम् अतिथिनां स्वागतं कृतम्। संस्थामन्त्रिणा श्रीचेतनव्यासेन च सर्वेषां समुपस्थितानां विदुषां पत्रकाराणां गणमान्यनागरिकाणां धन्यवादः ज्ञापितः। मंचसंचालनं श्रीहृदयेशचतुर्वेदिना कृतम्।।

नूतनकाव्यपृषता:

## बुद्धश्च वयञ्च

बुद्धस्तु बुद्ध आसीत्...
मूर्तिषु तस्य श्रद्धा नासीत्
किन्तु वयं बुद्धा न स्म:,
वयं प्रबुद्धा:।
वयं
मूर्तिषु स्थापयामोऽस्मान्।
बुद्धस्तु बुद्ध आसीत्,
तस्य हृदयं करुणार्द्रमासीत्
वयमपि करुणार्द्रा:,
हस्तिषु, गर्दभेषु,
शूकरेषु, मूषकेषु।
बुद्धस्तु शुद्ध आसीत्,
पूजासु कर्मकाण्डेषु
स उदासीन आसीत्।
वयम् अन्तरशुद्धा:,
दु:खमये संसारे
सुखानां प्रोन्नतद्वीपान् रचयितुं शक्ता:।
गृहे रुद्धो बुद्धस्तु अनिरुद्ध आसीत्,
महालयभितिषु,
भोगेषु, विलासेषु
वयं स्वर्गादधिकानि सुखानि
रोद्धुं शक्ता लीलया।
यतो वयं बोधिसत्त्वमार्गं वदाम:,
वदाम एव...।
बुद्धस्तु मुक्त आसीत्
क्षणिकमिदं सर्वमित्युक्त्वा
चिक्षेप बन्धनानि...।
वयं तु क्षणान् लाभे परिवर्तयितुं क्षमा:।
बुद्धोऽजानात् क्षणानां मूल्यम्,
वयमपि....।

❑ डॉ. हर्षदेवमाधव:

## लक्ष्म्या: चरणे

लक्ष्म्या: द्वे चरणे सहसैव
तिरोहिते जाते।
सायंकाले लक्ष्म्या: स्थाने
भाण्डागारेषु अलक्ष्मीरभवत्।
निर्धना: समृद्धिरङ्का: पामरा:
लघुकेषु नाणकेषु
सस्पृहा जाता:।
स्वर्गाल् लक्ष्मीर्यथा गता
दुर्वासस: शापात्,
प्रविष्टा तत्र ज्येष्ठा अलक्ष्मी:
तथैव द्विनद्वयं यावत्
विपणिषु
सर्वे परस्परं विलोकयन्त:
स्थिता:।
सूर्यग्रहणवद्
द्रव्यभावेऽपि द्रव्याभाव:।
'नासतो विद्यते भाव:' गुञ्जति स्म
हृदयेषु......।
सर्वेऽपि लक्ष्मीवन्त: क्षुद्रा:
लक्ष्मीं मार्गयन्त: व्याकुला अभ्रमन्।
लक्ष्म्याश्चरणयो: स्थाने केवलं तस्या: पदचिह्ने
अतीतधूलिधूसरे धूमवर्णे अवशिष्टे।
[८-११-१६] प्रधानमन्त्रिणा
पञ्चशत-सहस्त्र रूप्यकाणां-नाणकयो: प्रतिसंहारस्य
घोषणा कृता। तदा दिनद्वयं यावत्
भारतस्य जनानां व्याकुलतां वीक्ष्य...
देवा अपि करुणया अद्रवन्।
तदनु च लक्ष्म्या
दर्शनाकाङ्क्षिणो बैंकद्वारेषु
पङ्क्तिबद्धा अद्यापि दृश्यन्ते।

४, राजतिलक बंग्लोज, आबादनगरं,
बस स्टॉपसमीपे, बोपल, अहमदाबाद

व्यङ्ग्यपृषताः

# भगवान् मनुश्च मानवाश्च

❑ डॉ. हर्षदेवमाधवः

भगवन् मनो!
भवान् प्रहारान् सोढुम्
अस्मान् जनयामास।
भवन्नाम
गालीदानार्थं श्रेष्ठसाधनम्।
भवता पापं कृतं
मानवेभ्यो
मार्गं सूचयितुम्।
तेन सहस्रपापानि कृतानि
समाजव्यवस्थां कर्तुम्।
यदि भवान् उपस्थितोऽभविष्यत्
तर्हि
वयं प्राणदण्डशतादपि
अधिकदण्डम् अदास्याम।
किन्तु
पिहितद्वारे गृहे
भवन्तं पूजयामो वयम्,
यतो हि-
जातिरेव वह्निरस्ति
(वयं
लङ्कादहनं कर्तुं क्षमाः)
जातिरेव भित्तिः
जातिरेव निःश्रयणी
जातिरेव चतुष्पटम् (चौपाट)
जातिरेव भूकम्पोद्गमकेन्द्रम्।
वयं क्रीडामस्तदा कन्दुकः,
खादामस्तदा मोदकः,
पाययामस्तदा मदिरा,
क्षिपामस्तदा वह्निगोलकः,
स्फोटयामस्तदा स्फोतकः (Fire-craceker)
साधु रे मनो ! साधु,
धिक् त्वां मनो ! धिक् त्वाम्,
जातिर्न गच्छति, न विनश्यति,
धर्मो गच्छति, देहो गच्छति,
संस्कृतिर्गच्छति, नामानि गच्छन्ति,
जातिः स्वात्मोत्कीर्णा तथैव प्राणधर्मः।
जातिः प्राणप्रदः प्रदार्थधर्मः,
गौः स्वरूपेण गौर्नाप्यगौः
गोत्वाभिसम्बन्धात्तु गौरिति वाक्यपदीयकाराः
भवतो ग्रन्थो
गच्छेद् रसातलम्,
भवतो नाम
भवेन्निन्दनीयम्,
भवतो विचारा अपि
भस्मसाद् भवेयुः।
अत एव
अस्माकं गालीप्रदानकोशः
क्षीणो न भवेत्,
तावत्पर्यन्तं
निन्दिष्यामो वयम्।
(वैरेण स्मरणमपि भक्तिर्भवति।)

8, राजतिलक बंग्लोज, आबादनगरं,
बस स्टॉपसमीपे, बोपल, अहमदाबाद

## उदन्तोऽदन्तः

प्रकाश्यमगात् समाचारपत्रेषु
उदन्तोऽदन्तः,
समजायत शोधसंगोष्ठी
यत्र विश्व-विश्वस्य
लब्धयशस आयुयुः
वैज्ञानिका विद्वांसः
भाषमाणाश्च समूचुः -
मन्दाकिन्या आकाशगंगायाः
सरलतरलप्रवाहे
प्रवहमानास्तारा
अकस्मादेव कृष्णसुरंगे (ब्लेक होल)
विलीनीभूय नष्टाः
तत्रास्माकं पृथिव्याः
सौरमण्डलमपि
तस्मिन्नेव पथि
अग्रेसरमभूत्,
परन्तु भारतीय-वैज्ञानिकाः
सावधानीभूय
प्रामुख्यं भजमानं भानुं
भानुभिरेव समाचकर्षुः
येनाद्यापि जीवामो वयम्।

❑ प्रो. ताराशंकर शर्मा

## कालिदासो भूत्वा

अस्ति कश्चिद् वाग्विशेषो
यो हि कालिदासो भूत्वा
रचयेत् किमपि नवीनं साहित्यम्
यत्र नो राजा अपितु
नायिका च भूयादासन्दिका
यां परितः परिभ्रमेयुः प्रतिनायकाः
तान् सामदामदण्डभेदैर्विजित्य
आसन्दिकास्थो रघुरिव कोऽपि
राज्यलक्ष्मीमुपभुञ्जीत।
अन्यत्र च प्रजादेवो नायकीभूय
पणियेत् कामपि
अपर्णामपराम्।
सन्देशहरश्च भवेत्।
कश्चिद् गूगलस्थो मेघदूतः,
योऽवतरेद् यत्र कुत्रापि
चाल्यमाने लेखष्टोमे (लेपटॉप)
ज्योतिर्लिङ्गीभूय वाग्विशेषः।

आचार्यः, साहित्य-विभाग एवं निदेशकः,
शैक्षणिक-परिसरः, जरारासंविवि. जयपुरम्

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री

# साहित्यशास्त्रस्य व्यापको विमर्शः

संस्कृतजगति प्रतिष्ठितस्य राष्ट्रपतिसम्मानितस्य कविमूर्धन्यस्य कालिदासमर्मज्ञस्य काव्यशास्त्राधुरन्धरस्य म.म.प्रो. रेवाप्रसादद्विवेदिवर्यस्य नूतना काव्यशास्त्रेतिहासविवेचिनी, व्यापकविश्लेषणपरा शास्त्रीया कृतिः ''साहित्यालङ्कारः'' शीर्षकवहा सम्प्रति हिन्दीभाष्यसहिता प्रकाशितेति प्रमोदास्पदं वृत्तम्। 639 पद्येषु (कारिकासु) समग्रस्य साहित्यशास्त्रस्येतिहासं व्याचक्षाणायामस्यां कृतौ प्रो. द्विवेदिवर्येण क्रान्तिकारिणीं विमर्शदृष्टिं प्रस्तुवता तदिदं स्पष्टीकृतं यद् वेद कालादारभ्य काव्यस्य, साहित्यस्य वा मूलभूतो यश्चमत्कारस्तस्य परिभाषणमारब्धं काव्यशास्त्रिभिः किन्तु मध्ये काश्मीरकैरानन्दवर्धनाभिनवगुप्तप्रभृतिभिः सर्वविधं महत्त्वं ''ध्वनि'' नामकाय कस्मैचन तत्त्वाय प्रत्तं यद् बौद्धप्रभाववशादेवाऽभूदन्यथा अलंकारः, शब्दोत्था मनःस्पर्शिनी चमत्कृतिः इत्यादिकमेवाऽभूत् काव्य-जीवितम्। अत एव परस्तादस्य नामकरणम् अलङ्कारशास्त्रं, काव्यशास्त्रं, साहित्यशास्त्रं चेत्याद्येवाऽभूत्। भोजराजः ''साहित्यशास्त्रं'' स्पष्टतया व्याख्याति।

सर्वस्यास्येतिहासस्य विशदं शास्त्रीयं विश्लेषणं प्रस्तुवन् प्रो. द्विवेदी वक्ति- ''विकल्पः सुन्दरः काव्यमिति काव्यस्य लक्षणम्।'' पतञ्जलिर्मानसक्रियाणाां विवेचनं विदधानस्तथाविधमास्वादं शब्दज्ञानोत्थं ''वस्तुशून्यं विकल्पं'' वक्ति। सर्वमिदं विवृण्वन् विद्वद्वर्यः पूर्णताकल्पं, गुणकल्पं अस्फुटालङ्कारकल्पं, स्फुटालङ्कारकल्पं, साहित्यकल्पं च वर्णयन् काव्यशास्त्रे पञ्चकल्पान् प्रस्तौति, 'अरम्' अलम् इत्यादिपदैरलङ्कारतत्वस्य प्राचीनतममुत्सं पाण्डुलिपिभ्य उद्धरन् स्थापयति मतमिदं यद् ध्वनिसम्प्रदायो यः काश्मीरकैराविष्कृतः स केवलं बौद्धप्रभावस्य परिणामः। ध्वनिवादिनः सर्वे प्रच्छन्नबौद्धाः। अतो हि ग्रन्थस्य मुखपृष्ठे स्पष्टमुद्धृतमस्ति साहित्यागमोऽस्माकं विषयः, अत्र ध्वनिः अमान्यः, शब्दशक्तयः अमान्याः विकल्पवादो मान्यः। अलङ्काराणां रसस्य च य आस्वादः स एव काव्यशास्त्रस्यात्मा। अतः साहित्यशास्त्रमिदम्, अलङ्कारशास्त्रमिदम्। सर्वेषां काव्यशास्त्रविवेचकानां भामहादारभ्य पण्डितराज-जगन्नाथपर्यन्तानां स्थापनां विवेचयन् हृदयावर्जकैः कुत्रचन तिक्तप्रहारकरैः, कुत्रचन विनोदपरैः पद्यैः नूतनां विमर्शदृशं प्रस्तुवन्नयं ग्रन्थो नूतना दिशः प्रकाशयति।

मूलपाठस्य प्रकाशनं पूर्वं सञ्जातमासीद् यस्य चर्चा ''भारती'' पाठकैः पठिता स्याद् गतेष्वङ्केषु किन्तु सम्प्रति हिन्दीभाष्यसहितोऽयं ग्रन्थो वैशद्येन समस्तं काव्यशास्त्रेतिहासं नूतनया विमर्शभङ्ग्या विवृण्वन् चक्षूंष्युन्मीलयिष्यति बहूनामिति स्पष्टमनुभूयते।

साहित्यागमस्य यन्मूलचिन्तनमासीत्तस्य विरोधे (तदनु समर्थनऽपि) ध्वनिवादादयः पञ्चक्रान्तय उत्थिता याभिरस्माकं दृशो धूमिलीकृता मध्यकाले इति प्रो. द्विवेदिनः स्थापना ग्रन्थेऽस्मिन् सप्रमाणं प्रस्तुताऽस्ति। ध्वनिवादः (सौगतः) आगमविरुद्धोऽभूत्, तदनु रुद्रट-राजशेखर-कुन्तक-क्षेमेन्द्र-मुकुलभट्ट-महिम-भट्टादिभी रसस्यालङ्कारस्य च काव्यकृति-सर्वस्वता प्रतिपादिता काव्यगुणाश्च वर्णिताः। तृतीयायां क्रान्तौ शब्दशक्तीनां वात्या दृश्यते। भोजेन तदनन्तरं साहित्यकल्पस्य या प्रतिष्ठा विहिता तस्याः सुस्पष्टं विश्लेषणं द्विवेदिभिः कृतम्। एतर्हि भोजराजीय-ग्रन्थानां शृङ्गारप्रकाशादीनां यः परिष्कारो विद्वज्जगति प्रकाशितः स चिरस्मरणीयोऽस्त्येव। अस्मिन् ग्रन्थेऽपि शृङ्गार-

प्रकाशस्य कथा प्रसङ्गवशात् स्पष्टीकृता प्रो. द्विवेदिवर्यैः। शब्दशक्तिविखण्डनानन्तरं विकल्पवादस्य स्थापनं यदत्र पर्यन्ते दृश्यते तदपि विद्वज्जगतो ध्यानाकर्षणं विदध्यादेव।

मूलग्रन्थेन सह हिन्दीभाष्यं प्रो. द्विवेदिनां लेखन्या एव प्रसादः। प्रारम्भे या विस्तृता वैदुष्यविभूषिता भूमिका आङ्गलभाषायां सुप्रथितैर्विद्वतल्लजै राष्ट्रिय-संस्थानस्य कुलपतिचरैः प्रो. राधावल्लभत्रिपाठिभिः प्रसादीकृता साऽपि सविमर्शं ग्रन्थस्य हार्दं स्पष्टीकरोति यत्र प्रो. त्रिपाठिवर्योऽपि सहमतिं प्रस्तौति यत्काव्यशास्त्रे आनन्दवर्धनाभिनवगुप्तादीनां धर्मकीर्ते-रनुयायिनां ध्वनि-सिद्धान्तं प्रसारयतामभिगमः प्रच्छन्नबौद्धत्वं बिभर्तीति प्रो. द्विवेदिवर्याणां मतं सुतरां क्षोदक्षमम्। नूतनस्यास्य व्यापकविमर्शस्य हार्दं स्वागतं विदधानाः सुतरामभिनन्दामः प्रो. रेवाप्रसादद्विवेदि-वर्यान्, सर्वांश्च सहयोगिनो विद्वत्प्रवरान् प्रकाशकांश्च।

**साहित्यालङ्कारः** ले. म. म. प्रो. रेवाप्रसादद्विवेदी प्रका. कालिदाससंस्थानम्, 28 महामनापुरी, पो. काशी हिन्दू विश्वविद्यालयः, वाराणसी 5 पृ. सं. 200 मू. 250/-.

## चित्रकाव्यम्

अस्माकं साहित्ये काव्यानां ये विविधा भेदा वर्णितास्तेषु खड्गबन्ध-चक्रबन्धादयः सुविदिता एव। महाकविभिः स्वकीयकाव्येषु कतिपयानि पद्यान्येव व्यलेखिषत एवंविधेषु बन्धेषु निबद्धानि। पाठकानां सुमहान् विस्मय एव भवेद् यदि ते सूच्येरन् यदाधुनिककाले समस्तमप्येकं काव्यं गोमूत्रिकाबन्ध-निबद्धैः पद्यैरेव प्रणीतमस्ति प्रकाशितं चाऽपि। इदं काव्यमस्ति ''चित्रनैषधम्।'' नलदमयन्ती-विवाहकथां चित्रयदिदं खण्डकाव्यं डॉ. शङ्कर‌राजारामन्वर्येण प्रणीतमस्ति। कविरयं स्वयम् एलोपेथिकचिकित्स-कोऽस्ति किन्तु संस्कृतपण्डितोऽस्ति, कविरपि। ऐषम एव चत्वारिंशद्वर्षवयस्कोऽयं संस्कृतकविर्भारतराष्ट्र-पतिना बादरायणपुरस्कारेण सम्मानित इति श्रुतं स्याद् विद्वद्भिः।

डॉ. शङ्करेण खण्डकाव्येऽस्मिन् सर्गचतुष्टये नलदमयन्त्योः पूर्वरागः, हंससन्देशः विवाह इत्यादयो घटना अनुष्टुप्सु वर्णिताः, सर्वेष्वपि पद्येषु गोमूत्रिकाबन्धः स्पष्टं परिदृश्यते। पञ्चमे सर्गेऽनेन स्ववंशपरिचयो-ऽप्यनुष्टुप्सु निबद्धः। सम्प्रत्येव मुम्बईस्थेन ''अनामय'' प्रकाशनेन प्रकाशितेऽस्मिन् खण्डकाव्ये प्रथमतः चत्वारोऽपि सर्गाः प्रतिपद्यं हिन्द्यनुवादेन, आङ्गलभाषानुवादेन च सह मुद्रिताः सन्ति, तदनन्तरं पञ्चमः सर्गो मूलरूपेण मुद्रितः। तदनन्तरं प्रत्येकं पद्यस्य गोमूत्रिकाबद्धं स्वरूपमपि पूर्णतः प्रदर्श्य समस्तं खण्डकाव्यं तदनुरूपं मुद्रितमस्ति। हिन्द्यनुवादः अङ्कुरनागपालेन कृतः, आङ्गलभाषानुवादः स्वयं कविना कृतः। प्रस्तावना प्रारम्भे स्वयं कविना आङ्गलभाषायां विलिखिता, संस्कृते च दिल्ली-विश्वविद्यालयीयेन डॉ. बलराम- शुक्लेन।

प्रकाशकीयम् अनामयप्रकशनाधिपतिना श्रीनित्यानन्दमिश्रेण विलिखितमस्ति। मिश्रमहोदयोऽपि वैविध्यमयजीवनयात्राया धनी इति ज्ञात्वा विस्मयेरन् पाठकाः। मूलतः संस्कृतविद्वत्परिवारे लब्धजन्माऽस्ति नित्यानदमिश्रः। अयं परिवारः खलु चित्रकूटस्थ-विकलाङ्गविश्वविद्यालयस्य कुलाधिपतीनां विद्वत्कुल-चूडामणीनां महाकविवर्याणां रामानन्दाचार्य-परम्परायां चित्रकूटस्थ-तुलसीपीठाधीश्वराणां श्रीरामभद्रा-चार्याणामस्ति। नित्यानन्दमिश्रः संस्कृतं स्वेच्छया-ऽधीत्य अभिकलित्रयान्त्रिकीविज्ञानस्य पारदृश्वा भूत्वा मुम्बईस्थे मूर्धन्ये प्रतिष्ठाने उच्चं प्रबन्धकपदमधितिष्ठति किन्तु स्वात्मसन्तोषाय संस्कृताध्ययने, धर्माचरणे, लेखने प्रकाशने च बद्धरुचिः अनामयप्रकाशनसंस्थाने भारतीय-विद्या-परिगृहीतान् विषयानवलम्ब्य विविधानि

प्रकाशनानि प्रवर्तयति। एतस्यैव परिणतिरस्ति गोमूत्रिकाबन्धबद्धस्य चित्रकाव्यस्यास्यानुवादद्वय-समलंकृतं प्रकाशनम्। नूनं विस्माययेत् प्रसादयेच्च पाठकानिदं खण्डकाव्यं, स्वागतं च विदध्यात् संस्कृतसेविवर्गोऽस्येति विचिन्त्य वर्धापयामोऽस्य प्रणेतारमनुवादकं प्रकाशकं सहयोगिनश्च सर्वान्। पुस्तकस्य प्रारम्भे देशस्य चतुर्ष्वपि दिक्षु प्रतिष्ठितानां विदुषां प्रशस्तयोऽपि मुद्रिताः, अवाच्यां दिशि शतावधानी, बादरायण-पुरस्कारसम्मानितः रा. गणेशः (बेंगलूरु) उदीच्यां दिशि विद्वन्प्रवरः कविचूडामणिः डॉ. अभिराज राजेन्द्रमिश्रः (शिमला), प्रतीच्यां दिशि देवर्षिकला-नाथशास्त्री (जयपुरम्), प्राच्यां दिशि बादरायण-पुरस्कारसम्मानितः श्रीपरमानन्दझा (गङ्गौली)।

**चित्रनैषधम्-कविः डॉ. शङ्करराजारामन्, प्रकाशकः-निरामय पब्लिशिंग सर्विसेज, 1011, हबटाउन सोलरिस, अन्धेरी ईस्ट बेस्ट हाईवे, अंधेरी (ईस्ट) मुम्बई 69. पृ. 120 मू. 200/-.**

## विदुषी-विवेचन-सङ्ग्रहग्रन्थः

गुर्जरदेशस्थे सौराष्ट्रविश्वविद्यालये संस्कृत-विभागाध्यक्षपदमधिष्ठितवती राष्ट्रपतिसम्मानिता संस्कृतविदुषी डॉ. हंसाबेन हिंडोचा विदितैवास्ति संस्कृतजगति। सप्ततिवर्षाधिकमायुः संस्कृतसेवायै समर्पितवत्या अस्या विदुष्या अभिनन्दनं क्रियेत, तस्मिन्नवसरे कश्चिदभिनन्दनग्रन्थः प्रकाश्येत चेत्तस्य प्रमुखं विषयवस्तु किं स्यादिति पृष्टे सर्वथा प्रशस्यं विषयवस्तु तदिदमेव भवेद् यद् विदुष्या अस्या अभिनन्दनं कुर्वाणाः संस्कृतसेविनो महिलावर्गस्य संस्कृतेक्षेत्रे कृतं योगदानं स्मरेयुः। वेदकालादेव गार्गी, मैत्रेयी इत्यादय ऋषिकाः, तदनु शीलाविज्जामारुला-मोरिकाद्याः कवयित्र्यः, आधुनिककालेऽपि पंडिताक्षमा-रावप्रभृतयो विदुष्यः संस्कृतवाङ्मयस्य चिरस्मरणीयां सेवामन्वतिष्ठन्निति को न जानाति? इममेव विषयमवलम्ब्य प्रो. हंसाबेन हिंडोचा अभिनन्दनग्रन्थः प्रकाशितोऽस्तीति ज्ञात्वा प्रसीदेयुर्विद्वांसः। ग्रन्थस्यास्य शीर्षकं केवलमाङ्गलभाषायामभिहितमस्तीति कथान्तरं किन्तु ग्रन्थे विवेचनीयो विषयो वैशद्येनोपवर्णित इति प्रमोदास्पदम्। ''संस्कृतपालिप्राकृतसाहित्याय महिलानामवदानम्'' इति शीर्षकवहेऽस्मिन् विशाले ग्रन्थे सप्तसु खण्डेषु वेदकालादारभ्याऽऽधुनिक-कालपर्यन्तं संस्कृत-पालि-प्राकृतविदुषीणां कवयित्रीणां च विवरणं संस्कृते, हिन्द्यामाङ्गलभाषायां च विलिखितेषु भारतप्रसिद्धानां विदुषां विदुषीणां च लेखेषु समीचीनतया संगृहीतं भृशमुपकुर्यात् सर्वविधान् पाठकानिति सुमहतः सन्तोषस्य विषयः।

ग्रथस्य सप्तसु खण्डेषु प्रथमः खण्डः प्रो. हंसाबेन हिंडोचायाः परिचयं प्रस्तौति, द्वितीयः खण्डः सामान्यतया महिलावर्गस्य संस्कृतसेवाया व्यापकं विवरणं प्रस्तौति। तृतीये खण्डे विविधानां विषयाणां विशेषज्ञता यासु विदुषीषु वेदकालादारभ्याऽद्यावधि स्पष्टीभवति तासां विवेचनं विदधाति यथा-काव्यक्षेत्रे, नाटकेषु, कथासाहित्ये, शिलालेखेषु, व्याकरणे च। अत्र हि भाषात्रये विलिखिताः शोधविदुषां लेखाः प्राप्यन्ते। चतुर्थे खण्डे वैदिकवाङ्मये नारीणां योगदानं विवेचितमस्ति पञ्चमे च बौद्धसाहित्ये जैनसाहित्ये च नारीणामवदानं स्पष्टीकृतमस्ति।

षष्ठे खण्डे कतिपयेषु भारतीयेष्वञ्चलेषु समुद्भूतानां विदुषीणां सर्वेक्षणं प्रस्तुतमस्ति (यथा वङ्गेषु, उत्कले, गुर्जरदेशे इत्यादि) अष्टमे च कतिपयासामाधुनिक-कालीनानां विशिष्टविदुषीणां परिचयः प्रस्तुतोऽस्ति। अष्टमे खण्डे सन्दर्भग्रन्थसूची मुद्रिताऽस्ति।

इत्थं हि नूतनस्य सामयिकस्य चास्य विषय-विशेषस्य साङ्गोपाङ्गं विवेचनं प्रस्तुवन्नयमभिनन्दन-ग्रन्थो नवीना दिशः प्रकाशयतीति सुतरां स्वागतार्हमस्य

पदार्पणम्। वयमभिनन्दनीयायाः प्रो. हंसाबेन हिन्डोचावर्याया दीर्घायुष्यं स्वास्थ्यं सक्रियतां च कामयमानाः सभाजयामस्तस्याः संस्कृतसेवां, वर्धापनैरभिनन्दामश्च सम्पादकवर्यान् प्रकाशकान् सर्वान् सहयोगिनश्च।

**Contribution of women to Sanskrit, Pali and Prakrit Literature (प्रो. हंसाबेन हिन्दोचा अभिनन्दनग्रन्थः) प्रधानसम्पादकौ डॉ. गौतम पटेल, डॉ. मणिभाई ई. प्रजापतिश्च, सम्पादकः मणिभाई का. प्रजापतिः प्रका. प्रो. हंसाबेन हिंडोचा अभिवादन समितिः A/8 कादिसर्व विश्वविद्यालय स्टाफ क्वार्टर्स, एल डी आर पी इंजीनियरिंग कॉलेज कैम्पस, सेक्टर-15, गांधीनगर, गुजरात पृ.सं. 610, मू. 1250/-**

---

**प्रेरकप्रसङ्गशतकम्** **सप्तचत्वारिंशः प्रसङ्गः**

# संशयात्मा विनश्यति

❑ **मा. श्रीमती आराधना धर्माधिकारी**

ज्योतिरादित्यः एकः प्रतापी नृपः आसीत्। तस्य हीरकेषु रत्नेषु च महती रुचिरासीत्। एकदा स स्वपुत्र्याः जन्मदिवसे बहुमूल्यानां हीरकाणामेकं हारमकारयत्। ज्योतिरादित्येनैको महान् उत्सव आयोजितः तस्मिन्नेव च समस्तातिथीनां मध्ये सः हारं:पुत्र्यै उपहारीकृतः। परं किंचित्समयानन्तरमेव स केनापि चोरितः। राजा परितः स्वरक्षिणः प्रैषयत् परं तस्य सैनिकाः हारमन्वेष्टुमसफला एवासन्। राजा उदघोषयद् यद् यः कोऽपि हारमन्विष्यानेष्यति तस्मै दशलक्षं दास्यते।

तस्मिन्नेव राज्ये निवसति स्मैको नापितः। यस्य नाम नटवर इत्यासीत्। एकदा नटवरः एकस्य तडागस्य पार्श्वतो गच्छन्नासीत्। तस्मिन्नेव तडागे देदीप्यमाना दिव्या कान्तिस्तस्य मुखमण्डले पतिता। स तडाग-मवधानेनापश्यत्। केनापि राज्ञो हारस्तत्र निक्षिप्त इवावलोकयत्। नटवरः स्ववस्त्राण्युपरि कृत्वा तडागे हारमन्वेष्टुमारभत। तस्य हस्तौ पादौ पङ्कलितावभूताम्। नटवरेण हारोऽधुनापि दृश्यते स्म परं यथैव तं धर्तुं प्रयतते स्म तथैव हारो विलुप्तो भवति स्म। आशा दशलक्षाणामासीत्। अधुना स अधोवस्त्राण्यवता-यतस्मिन् पङ्कमये जलेऽकूर्दत्। जले प्रविश्य हस्तौ पादौ चाभ्रामयत्। परं हारो न लब्धः। कोपेन निराशया च व्याकुलो यथैव निस्सृतः हारो दृष्टिगोचरोऽभूत्। तस्य सर्वं शरीरं पङ्कमयमजायत। स स्वस्मिन्नपि घृणामकरोत्। तदैव तत्र एकः साधुः समागतः। सः तं दृष्ट्वा अहसत्। नटवरस्य क्रोधः सप्तमे गगनतले आरूढः। तडागान्निस्सृत्य स उच्चैस्तं साधुमवदत्-त्वं जानासि विक्षिप्तोऽस्मि। मयेदं कार्यं केनाप्युद्देश्यविशेषेण विहितम्। यदि तत्पूर्णं भवेदहं त्वयि हसिष्यामि। सोऽचिन्तयदयमपि मम पुरस्कारात् स्वं भागं वाञ्छति। परं साधुरवदत्-तवोद्देश्यमहं जानामि नटवर। तवोद्देश्यं साधु, परं तस्य दिशा तदर्थं यत्नो न समीचीनः। तदर्थं त्वया स्वस्तरः उच्चैः कर्त्तव्यः। एवमुक्त्वा साधुस्ततश्चलितः। साधोः कथनस्यार्थस्तस्य बुद्धौ नायातः। परं तेन दृष्टिरुपरि कृता तदा तेनावलोकितं हारस्तु वृक्षशाखायामवलम्बितोऽस्ति जले तु तत्प्रतिबिम्बमेव। तेन विचारितं यमहं स्वशत्रुं जानामि सः तु मे हितैषी वयस्यः। सर्वत्र संशयो नोचितः।

**ब्रह्मपुरी, जयपुरम्**

श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने-

त्रयोविंशः प्रसङ्गः

# देहल्यां संघकार्यस्य विस्तारः

## देहल्यां संघकार्यस्य प्रारम्भः
## ( दिसम्बर 2016 अङ्कादग्रे )

❑ वेणीमाधव गो. धर्माधिकारी

देहल्यां हिन्दुमहासभाभवने एव राष्ट्रीय स्वयंसेवक-संघस्य प्रथमा शाखा प्रारब्धा। तत्पश्चात्कतिपय-दिनानन्तरमेव शाखानां विस्तारस्य विचारः समभवत्। श्रीआप्टेमहोदयाः नित्यमेव सायं शाखाकार्यक्रमानन्तरं स्वयंसेवकैः सह वार्तालापं कुर्वन्ति स्म। तदनन्तरं च तेषां गृहमपि गच्छन्ति स्म। मया स्मर्यते तेष्वेव दिवसेषु शाकविपण्यां (सब्जीमंडी) नूतनैका शाखा प्रारब्धा। हिन्दुमहासभायाः शाखाकार्यक्रमानन्तरं बाबामहोदयाः वार्तां कुर्वन्तः पंचकूपिकापर्यन्तं (पचकुईया) आगच्छन्ति स्म ततोऽहं द्विचक्रिकामारुह्य शाक-विपण्याः शाखाकार्यक्रमान् संचालयितुमगच्छम्। ततः परावर्त्तने बहुवारं रात्रेः दशवादनसमयो भवति स्म।

वार्तेयं दिसम्बरजनवरीमासयोरस्ति। शीतं तीव्रतर-मासीत्। वयं तु प्रथमवारमेव नागपुरत इतः समायाताः। एतावत् शीतस्यानुभवोऽस्मभ्यं नासीदेव। केवलमेकैकं कम्बलमेव गृहीत्वा समायाताः। आप्टेमहोदयाः अचिन्तयन् अयं नित्यमेव रात्रौ विलम्बेन समायाति, शीताधिक्येन रुग्णो न भवेत्। अतस्ते एकस्मिन् दिने मदर्थ-मेकमुष्णमङ्गरक्षक-(ओवरकोट) मानीतवन्तः। अहं विस्मितः समभवं-यत् उष्णाङ्गरक्षकक्रयणं तस्मिन् समये न सरलम्। अतोऽहं पृष्टवान्-उष्णाङ्गरक्षकक्रयणे महद्द्रव्यं व्ययीभूतं स्याद् इयद् द्रव्यं कुतः संगृहीतम्। पुनश्चवस्त्राणामावश्यकता तु भवद्भ्योऽप्यस्त्येव। तदा तैः कथितं-यत् तव सुहृत् शंकरकुरवेनामा एतद्द्रव्यं दत्तवान्।

घटना एवमभवद् यदाहं नागपुरतो देहल्यामागतः तदा मया सह शंकरकुरवे नामा मे वयस्योऽप्यागत आसीत्। यदा सः परावर्त्त्य नागपुरे गतस्तदा तस्य समीपे यद् द्रव्यमवशिष्टमासीत्सर्वं बाबामहोदयायेदं कथयन् समर्पितवान् सत्यामावश्यकतायामिदं वसन्ताय देयमिति। श्री आप्टेमहोदया एतावत्कालपर्यन्तं तत्संरक्षयन्त आसन्। दिसम्बरमासे च शीतनिवारणाय मह्यमुष्णाङ्गरक्षक-मानीतवन्तः।

श्री बाबामहोदयाः 1937 वर्षस्य फरवरीमासे यदा लाहौरनगरं गन्तुमुद्यतास्तदाऽहमवदं-पंच सप्त वा दिनानि त्वहं विना उष्णाङ्गरक्षकं व्यत्येतुं शक्नोमि, पुनश्च देहल्यां साम्प्रतं शीतं मन्दीभूतमस्ति। भवन्तः एतदुष्णाङ्गरक्षकं स्वकृते नयन्तु। मदाग्रहेण ते एतत् स्वेन सह लाहौरनगरं नीतवन्तः। एवमेकेनैवोष्णाङ्गरक्षकेणावयोरुभयोः शीतनिवारणव्यवस्थामकरवाव। एवं संघकार्यस्य तेषु प्रारम्भिकेषु दिवसेषु बह्वीषु संकटावस्थासु कार्यकर्तॄणां रक्षाव्यवस्थायां तेभ्यश्च प्रेरणाप्रदाने बाबामहोदयाः सचेष्टा आसन्।

ब्रह्मपुरी, जयपुरम्

# हास्यकाव्यानि

❑ जैन साध्वीशीलभद्राश्रीः, सांचोर, राज.

### ज्ञानशल्यशून्यमेव सफलम्

शिक्षकः प्रोक्तवांस्तातं, वर्षेऽमुष्मिंस्तवात्मजः
वर्गे मे प्रथमस्थान उत्तीर्णो ह्यभवन्ननु।। 1।।

आद्यस्थानाधिरूढोऽभूद् गतवर्षेऽपि ते सुतः।
प्रज्ञा तस्य प्रशस्यास्ति ज्ञानश्रिया स विश्रुतः।। 2।।

सुतश्लाघा श्रुता पित्रोक्तं तं प्रति सगर्वितम्।
तावत्सर्वपरीक्षायामेष्यत्याद्यपदे ह्यसौ।। 3।।

यावच्छिक्षणसंस्थानां प्रश्नपत्राणि शिक्षकैः।
मुद्रायितुं प्रहेष्यन्ते मद्बन्धोर्मुद्रणालये।। 4।।

यज्ज्ञानं मायया प्राप्तं तद्व्यर्थं, नैव शङ्करम्।
शल्यशून्यं च यज्ज्ञानं तन्नूनं सफलं भवेत्।। 5।।

### स्वात्मन्येव सुखम्

क्रयार्थं शैत्यकृद्यन्त्रस्यागमत्पण्यवीथिषु।
सोत्साहस्सरदारो ऽपि पृष्टवान् यन्त्रमूल्यकम्।। 1।।

विक्रेत्रोक्तं मया नैव विक्रेतव्यं भवादृशे।
परावर्तितवेशस्स द्वितीयाह्ना पुनर्गतः।। 2।।

विक्रयिणा तथैवोक्तं इष्टाशंसुः पुना रितः।
स्त्रीवेषी स तृतीयाह्ने तथैव कथितो ननु ।। 3।।

भवद्भि र्लक्षितोऽहं स्यां विविधरूपवान् कथम्।
क्रयिकेणेति संपृष्टेऽदो हि विक्रयिणोच्यते।। 4।।

यत्र तेङ्गुलिनिर्देशस्तद् वस्त्रक्षालयन्त्रकम्
न तच्छैत्यकृतं यन्त्रमेतावतैव ज्ञायते।। 5।।

यद्रूपमस्ति यद्वस्तु तद्रूपं तद्धि पश्यतु।
तद्वस्तावन्यधाज्ञाते मूर्खतेव प्रभासते।।

आत्मैव सुखवान् प्रोक्त इतरः सुखवान्न हि।
सुखार्थं प्रेक्षकोन्यत्र मूर्ख एव प्रकथ्यते।। 6।।

---

# हास्यकाव्यानि

❑ जैन साध्वीशीलभद्राश्रीः, सांचोर, राज.

### उद्यमेनैव सिध्यन्ति

द्वारपालस्वरूपेण श्रेष्ठतार्थं गतो जनः।
स्वामिनं पृष्टवान् मे हि, वार्षिकं वेतनं कियत्।। 1।।

आद्यवर्षे शतं सार्द्धं द्वितीये त्रिशतम्मितम्।
रूप्यकाणि प्रदास्यन्त इति स्वामी तमुक्तवान्।। 2।।

श्रुत्वैव सोऽवदत् स्वामिन् पश्चादेवैकवत्सरे।
आगमिष्याम्यहं नूनं तदेव मम सौख्यदम्।। 3।।

नातिलुब्धः समाप्नोति तृणमात्रमपि श्रियम्।
तलेऽप्यस्थितबालस्य, शिखरेच्छा निरर्थिका।। 4।।

पुरुषार्थं विना न स्यात् प्रगतिजीर्वनस्य हि।
उद्यमैः सिद्धकार्यस्य साफल्यं संभवेत् सदा।। 5।।

### मौनं सौख्यकरं मतम्

प्रत्यहं चन्दुरुद्यान आसीद् गच्छन् विलोकयन्।
लपन्तं च हसन्तं च स्त्रीसमूहं परस्परम्।। 1।।

तूष्णीकां तद्गणे दृष्ट्वा चन्दुना गच्छतैकदा।
विचारितमहो वाचामभावोऽत्र विद्यते कथम्। 2।।

पृष्टाः सविस्मयं ताश्च किं तद् मौनस्य कारणम्।
कृपया मह्यमाख्यातु कथं हास्यरवो न हि।। 3।।

अद्य मे समुदाये हि कासाञ्चिद् नानुपस्थितिः।
तदेव कारणं शान्तेरित्युक्तं योषिताग्रया।। 4।।

एकेनैव कृते मौने सर्वैस्तत्क्रियते यदि।
मौनं तेन तु कर्तव्यं सर्वत्र सर्वथा सदा।। 5।।

# शब्दब्रह्मप्राप्तौ उपायविमर्शः

❑ डॉ महेन्द्रशर्मा

शब्दब्रह्मप्राप्तौ अर्थात् तादात्म्यलाभाय = तादात्म्यभावाय उपयोगी कः उपायः ? शब्दब्रह्मण उक्तं यन्माहात्म्यं, तस्माद् यः संस्कारः शब्दसंस्कारोऽपभ्रंशविवेकेन ज्ञानं, सैव परमात्मनो नित्यस्य शब्दब्रह्मणः सिद्धिरिति अर्थाद् व्यवस्थितसाधुत्वेन रूपेण शब्दतत्वे संस्क्रियमाणे अपभ्रंशरूपप्रतिबन्धकोपशमे धर्मविशेषस्याविर्भावस्तत्शब्दब्रह्मतादात्म्योपरमरूपा ब्रह्मणः प्राप्तिरिति। शब्दसंस्कारः कथं तद्ब्रह्मणः प्राप्त्युपायः? शब्दतत्त्वस्य प्रवृत्तितत्त्वज्ञः प्रवृत्तिरपि षड्भावविकाररूपा, तस्यास्तत्त्वं प्रतिभा, तामेव योजनातिसतस्तदौषनिषदमृतं ब्रह्म समश्नुते, तेनैकीभवतीत्येवार्थः परमार्थः परमपुरुषार्थरूपः शाब्दिकसिद्धान्ते।

उक्तञ्चात्र भगवता भर्तृहरिणा वाक्यपदीये ब्रह्मकाण्डे –

**''तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।**
**तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते'' ।। इति।।**

शब्दः प्राणाधिष्ठानो बुद्ध्यधिष्ठानम् इति कृत्वा द्विविधः। तत्र शब्दः प्राणबुद्धिशक्तिभ्यां प्रतिलब्धाभिव्यक्तिरर्थं प्रकाशयति। यदा च प्राणवृत्तिं प्राणवायु व्यापारमाक्रामति, तदा वायोस्तत्तत् स्थानेष्वभिघातो न जायते इति शब्दे भेदरूपावभासो न भवतीति भेदरूपस्यासत्येनावबोधात् प्राणवृत्तिमतिक्रान्ते वाचस्तत्त्वे बुद्धिस्थे व्यवस्थितो भवति। तत्राप शब्दात्मा प्रत्यवभासमानः सक्रम इवावभासत इति क्रमसंहारयोगेन क्रमराहित्यभावनया आत्मनि बुद्धौ आत्मानं शब्दं संहृत्य क्रमसंहारबुद्ध्या विषयीकृत्य वाचः संस्कारः ध्वन्युपरागराहित्यरूपं कृत्वा वाचं ज्ञाने निवेश्य, अस्या वाचो बन्धनानि भेदरूपाणि विभज्य, वाचमेनां छिन्नबन्धनामविद्याऽहङ्काररहितां विधाय छिन्नग्रन्थिपरिग्रहः सन् आन्तरं ज्योतिः पश्यन्ती वाग्रूपं समासाद्य ग्रन्थीन् छित्वा परेण शब्दब्रह्मणा ज्योतिषा एकत्वं प्रतिपद्यते। यथोक्तं–

**''प्राणवृत्तिमतिक्रान्ते वाचस्तत्त्वे व्यवस्थितः।**
**क्रमसंहारयोगेन संहृत्यात्मानमात्मति।।**
**वाचस्संस्कारमाधाय वाचं ज्ञाने निवेश्य च।**
**विभज्य बन्धनान यस्याः कृत्वा तां छिन्नबन्धनाम्।।**
**ज्योतिरान्तरमासाद्य छिन्नग्रन्थिपरिग्रहः।**
**परेण ज्योतिषैकत्वं छित्वा ग्रन्थीन् प्रपद्यते''।।इति।।**

शब्दराशयो वेदा अपि परमतत्त्वस्यानुकारः, यथा प्रतिबिम्बदर्शनेन बिम्बमपि लोको ज्ञातुं शक्नोति, एवं शब्दब्रह्मानुकाररूपस्य वेदस्य शब्दब्रह्मोपलब्धये सुसामर्थ्यं सुस्पष्टमवधार्यमेव। 'ऋषयो मन्त्राद्रष्टारः' इत्यास्तिकानां समादृतः समयः सर्व विदितप्रायः। ते हि मन्त्रार्थं साक्षादवगच्छन्ति। मन्त्रार्थसाक्षात्कारश्च बोधगम्य एव, न तु बुद्धिगम्यः। मन्त्रार्थस्य प्रत्यक्षानन्तरमृषयो विलक्षणां तादृशीमवस्थामुपगच्छन्ति, यस्यां खलु ते स्वानुभूतमर्थमन्येभ्यो विनिवेदयितुं लब्धसामर्थ्याः समुत्सुकाः भवन्ति। एवं विधायां स्थितौ यदाऽलौकिकं तत्त्वं परं रत्नं बोधिप्रसादेन प्रभावेन वा समधिगच्छन्ति तदा तेऽपि स्वान्तरुद्यन्तं भावं यथा गिराऽऽविर्भावयन्ति, सैव वाक् शब्दमयी वेदरूपैव।

वेदरक्षकत्वेनापि व्याकरणमर्थवदिति भगवान् पतञ्जलिः ''रक्षोहागमलघवसन्देहाः प्रयोजनम्'' इति प्रतिपादयन्नस्य शब्दब्रह्मणो महिमानं स्तौति। तेन षट्सु वेदाङ्गेष्वन्यतमत्वं प्रख्यापितमेव। भगवान् भर्तृहरिरपि विषयेऽस्मिन् मौनमालम्बते; किन्तु बहूक्तानि वचांसि प्रमाणभूतानि।

यथैकं तस्य महत्त्वपूर्णं वचनं प्रस्तूयते–

**''इदमादाय पदस्थानं सिद्धिसोपानपर्वणाम्।**
**इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः''।। इति।।**

अर्थात् सिद्धिमोक्षः तस्य या अन्तरालावस्था तस्यास्ताः, तत्प्राप्तौ सोपानतुल्यत्वात् सोपानानि तेषां विभागः पर्वाणि तेषां मध्य इदमेव व्याकरणं प्रथमं पदस्थानं पर्व। मोक्षमाणानां मुमुक्षूणां सा इयमजिह्वा अवक्रा अकुटिला समीचीनोपाया राजपद्धतिरिति।

शास्त्रेषु ज्योतींषि त्रीणि वर्तन्ते- वह्न्यादिपदार्थ एकं ज्योतिः, तेन ज्योतिषा तमसावृत्ताः पदार्थाः प्रकाश्यन्ते, द्वितीयं वृत्तिज्ञानमपि प्रकाशरूपम्। वृत्तिज्ञानेन तद्विषयस्यार्थस्य प्रकाशो भवति। बुद्धेरर्थप्रकाशकत्वमपि लोके विदितमेव। तस्माद् बुद्धेरपि प्रकाशकत्वं मन्यत एव; परन्त्वनयोर्द्वयोः प्रकाशयोः प्रकाशकोऽपरः कश्चन पदार्थोऽस्तीति तृतीयः प्रकाशः शास्त्रेषु शब्दाख्यः, तस्य प्रकाशरूपत्वं मनसि कृत्वैव प्रमाणयति महतां वचसा-

**इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।। इति।।**

इदमेव तार्तीयकं ज्योतिः, तन्नूनं किमप्यद्भुत-मलौकिकतत्त्वमिति पूर्वोक्तस्य प्रकाशद्वयस्य लौकिकत्वात्। तस्मादत्र वैयाकरणसम्मतं मतमेव सर्वथा ग्राह्यम्। अस्मादेव कारणात् तादृशस्य लोकोत्तरस्याद्वय-रूपस्य ज्योतिः, पदार्थस्य शब्दरूपस्य अवबोधानन्तरं तस्यैव सम्यक् प्रयोगे सार्वत्रिक इष्टलाभः सञ्जायते।

''एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति'' इति भगवतः पतञ्जलेः कथनमिद-मतीव महत्त्वपूर्णं वर्तते सिद्धान्ततः। भगवता भर्तृहरिणाऽपि तादृशस्यालौकिकस्य तत्त्वस्य ब्रह्मपदेनेव यद्वक्तव्यं, तदक्षरपदेन, परमब्रह्मपदेन, शब्दतत्त्वपदेन च क्रियासमभिव्याहारं प्रत्यपादि। उक्तञ्च-

**''यत्र वाचो निमित्तानि चिह्नानीवाक्षरस्मृतेः।**
**शब्दपूर्वेण योगेन भासन्ते प्रतिबिम्बवत्''।। इति।।**

शब्दपूर्वेण योगेन युक्तो योगी यदा जायते, तदा विश्वमखिलं प्रतिबिम्बायमानं भासते। प्रतिबिम्बपदार्थस्य सत्यत्वं मिथ्यात्वं वेति भिन्नः पन्था विमृश्य एव। शब्द-शास्त्रेऽस्मिन् सम्यगभिनिविष्टस्य शब्दब्रह्मोपासकस्य वाचो निमित्तानि प्रकृतिप्रत्ययादीनि प्रतिबिम्बवद् भासन्ते।

व्याकरणस्य सम्यगध्ययनविषये शब्दपूर्वकयोगा-श्रयणेन तत्सम्पादनीयमिति सिद्धान्तः। योगो नामात्र सम्बन्ध एव। स च योगशब्दपूर्वको हि कीदृशोऽभिप्रेतः? समाधानमितिशब्देन अर्थात् शब्दाख्येन चैतन्येन योगः सम्बन्धः सःक्रमसंहारेण आश्रयितव्यः, वैयाकरणकृता-श्रयः शब्दयोगविद् भवति, वाग्योगविच्च भवति। एवं विधदेशकालानवच्छिन्नरूपस्य परमतत्त्वस्य स्थितेरस्माकं शब्दोपासकानां कालकृतो देशकृतो वा क्रमस्तत्र प्रचाकसीति। इत्थं कालकृतस्य देशकृतस्य वा क्रमस्य पूर्वत्वापरत्वरूपस्य सम्यगुपसंहारे समुपजायमाने लोकोत्तरा स्थितिर्जायत एव। अतः शब्दसंस्कारपूर्वकैव सा सिद्धिरभिहिता-

**तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।**
**तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते6।।**

**संदर्भ पादटिप्पणी**

1. भर्तृहरिः वा. प. ब्रह्मकाण्डम्। का. 131।।
2. भर्तृहरिः वा. प. ब्रह्मकाण्डम् 1। 131 इति कारिकाव्याख्यायां हरिवृषभदेवेनाद्धृताः कारिकाः इमाः।
3. तत्रैव काः।16।। वाक्यपदीयम्। ब्रह्मकाण्डम्
4. काव्यादर्शः का 4।।
5. भर्तृहरिः वा.प़. ।20
6. भर्तृहरिः वा. प. ब्र. का. का. 131।।

**शोधच्छात्रः**
**स्वामी लक्ष्मीराम शोध संस्थान,**
**मोती डूंगरी रोड़, जयपुरम्**

# संस्कृतश्लोकान्त्याक्षरी-प्रतियोगितायाः आयोजनम्









राजगङ्गा-चेरिटेबल-ट्रस्ट एवं राजकीय-महाराज-वरिष्ठोपाध्याय-संस्कृत-विद्यालयः जयपुरम् इत्यनयोः संयुक्ततत्वावधाने संस्कृत-श्लोकान्त्याक्षरी प्रतियोगिता जनवरी मासस्य द्वादशे दिनांके (12.1.2017) समायोजिता। प्रतियोगितायामस्यां जयपुरमण्डलस्य छात्राः आगतवन्तः। निर्णायकत्वेन प्राध्यापकौ द्वौ आस्ताम्।

प्रतियोगितायां प्रथमं पुरस्कारं रा. व. उपा. संस्कृत विद्यालयः बिलौंची इत्यस्य बालिके (1. नन्दिनी दोतोलिया, 2. मीना कुमारी गुर्जरः) प्राप्तवत्यौ। द्वितीयं पुरस्कारं रा. प्रवेशिका-संस्कृत विद्यालयः, विमलपुरा, फागी इत्यस्य बालिके (1. कोमल सैन, 2. सीमा प्रजापत) प्राप्तवत्यौ। तृतीयं पुरस्कारं रा. वरिष्ठोपाध्याय-संस्कृत विद्यालयः नारेडा, फागी इत्यस्य छात्रौ (1. दिनेश कुमावत, 2. भँवरलाल प्रजापत) प्राप्तवन्तौ।

कार्यक्रमे अध्यक्षरूपेण प्रो. श्रीलक्ष्मीनारायणआसोपा महोदयाः मुख्या-तिथिरूपेण प्रो. श्रीकृष्णशर्ममहोदयाः, विशिष्टातिथिरूपेण श्री डॉ. कमलकिशोर-चोटियामहोदयाः तथा सारस्वतातिथिरूपेण न्यासस्य संस्थापिका प्रो. राजेश्वरीभट्टमहोदयाः आसन्। कार्यक्रमे समागतानां समेषाम् अतिथीनां संस्था-प्राचार्येण डॉ. श्री चन्द्रप्रकाशशर्म-महोदयेन स्वागतं कृतम्। सर्वे जनाः संस्कृतभाषायाः प्रचार-प्रसाराभ्यां संकल्पं स्वीकृतवन्तः।

# श्री करणीचरितामृते वैयाकरणवैदुष्यम्

❑ प्रद्युम्न शर्मा

परस्परं मानवविचाराणाम् अभिव्यक्तिं शुद्धां, परिष्कृतां परिमार्जितां च कर्तुं भाषाविशेषस्य व्याकरणमावश्यकम्। षट्सु वेदाङ्गेषु प्रधानं व्याकरणं न केवलं वेदमन्त्रेषु विद्यमानानाम् शब्दानाम् अर्थावबोधनं करोति परं तु तेषां रक्षणमपि करोति। व्याकरणेन भाषा व्यवस्थिता क्रियते। भाषाव्यवस्थितकरणाय व्याकरणस्य विश्लेषणमावश्यकं भवति।

डा. स्वीटमहोदयानुसारेण-व्याकरणं भाषायाः विश्लेषणम्। उद्यानवनस्य मनुष्यपशुपक्ष्यादिभ्यः कण्टकाकीर्णं तन्त्रीकवचं यथा रक्षकं भवति तथा भाषायाः रक्षकमस्ति व्याकरणम्।

वैयाकरणाः न केवलं व्याकरणशास्त्रीयग्रन्थान् अपितु संस्कृतकाव्यमपि प्रणीय संस्कृतकाव्यलेखन-परम्परायां स्वाभूतपूर्वं योगदानं दत्तवन्तः।

वैयाकरणप्रवरः पाणिनिः ''जाम्बवतीजयम्'' इति काव्यस्य प्रणेता राजशेखरोऽप्यत्रार्थे -

**नमः पाणिनये तस्मै येन रुद्रप्रसादतः।**
**आदौ व्याकरणं प्रोक्तमनुजाम्बवतीजयम्।।**

वररुचेः काव्यस्य नाम ''कण्ठाभरणम्'' इत्यासीत्।

**यथार्थतां कथं नाम्नि मा मा वररुचेरिह।**
**व्यधत्त कण्ठाभरणं यः सदारोहणप्रियः।।**

''व्याडि'' इत्यनेनापि ''संग्रह'' इति ग्रन्थस्य प्रणयनं कृतम्। व्याकरणस्य दार्शनिकपदानां विवेचनार्थं भट्टिना ''भट्टिकाव्यं'' विरचितम्।

अस्यां परम्परायां कवित्वप्रतिभासम्पन्नः बीकानेर-स्थराजकीयाचार्यसंस्कृत-महाविद्यालयस्य व्याकरण-विभागाध्यक्षः वैयाकरणप्रवरः डॉ. महावीरप्रसाद-सारस्वतमहाभागः सादरं स्मरणीयोऽस्ति। यो हि भगवत्याः श्रीकरणीदेव्याः दिव्यं चरितमादाय ''श्रीकरणीचरितामृतम्'' इत्याख्यं महाकाव्यं सरलया प्रसादमधुरया गुणालङ्कारैरलंकृतय संस्कृतगिरान्य बध्नात्।

''श्रीकरणीचरितामृतम्'' महाकाव्यमिदं भगवत्या दुर्गाया अवतारस्वरूपाया देव्याः करण्या जीवनचरितम् अवलम्ब्य विरचितमस्ति। अस्य महाकाव्यस्य कथावस्तु येन कालेन भू-भागेन च सम्बद्धमस्ति तस्मिन् काले तत्र देशे च प्रायो यदृच्छाशब्दा एव पुरुषाणां नामरूपेण प्रचलन्तिस्म-यथा-जोधाः, बिकाः, देपाः, शेखाः, नापाः, अक्खाः, नाक्खाः, पत्ताः, हापाः, चाम्पाः इत्यादय एते शब्दा हा हा शब्दवत् महाकविना प्रयुक्ताः।

**जोधाजिवीरः प्रथमो हि तेषु,**
**द्वितीयपुत्रः किल कान्धलश्च।**
**तृतीयसुनुः खलु वैरिसालः,**
**चाम्पाश्च तद्वा सकताश्च जग्गाः।**
**अक्खाश्च लक्खा अथ डूंगरश्च,**
**पत्ताश्च नत्थाः खलु बालनामा।**
**सांडश्च द्वापाः ननु रूपसंज्ञक,**
**बैराश्च कश्चित् किल माण्डणोऽपि।।2**

राजस्थानप्रदेशस्य परम्परामनुसृत्य आदरार्थे, छन्दोऽनुरोधेन च नामान्ते 'जि' इति शब्दोऽपि प्रयुक्तः। यथा- जोधाजिः, बीकाजिः, शेखाजिः इत्यादयः।

'माषं मषं कुर्याद्' इत्यनुसारं क्वचिद् आकारान्ताः शब्दा अपि अकारान्तीकृत्य महाकविना प्रयुक्ताः। यथा-देपाः-देपः, साठिकाः-साठिकः, गडियालाः-गडियालः इत्यादयः।

1. करणीचरितामृतम् */29
2. करणीचरितामृतम् */30

सरलतया अर्थावबोधनाय राष्ट्रकूट (क्षत्रियवंशः) इति शब्दस्य प्रचलितरूपं राठौड (राठौर) इति शब्दः कविना प्रयुक्तः।

महाकविः त्रयाणां काला नां सहैव प्रयोगं कृत्वा स्व-रचना पाण्डित्यं प्रदर्शयति-

**यस्याः कृपातो मम पूर्वजाताः,**
**प्रापुः सुराज्यं मरुभूमिभागे।**
**सैषा भवानी सततञ्च तच्च,**
**ररक्ष रक्षिष्यति रक्षतीह।।1**

महाकविः व्याकरणस्य दार्शनिकं भागमपि विवेचितवान्-

यथा-

**स्थितिः समाधेरयं योगिनां त्वम्,**
**भोगाय बुद्धिर्भवभोगिना त्वम्।**
**शब्देषु शक्तिर्बुधबोधिता या,**
**वाच्यश्च वाची सकलं त्वमेव।।2**

अत्र वाच्यवाचक भावसम्बन्धः शब्देषु वाच्य वाचक-शक्तिः च विवेचिता।

तथा च-

**शब्दात्मिका त्वञ्च मता सुधीभि-,**
**रर्थोऽपि शब्दान्ननु नैव भिन्नः।**
**शब्दार्थरूपासि तथा सुसिद्धम्,**
**देवीमयं सर्वमिदं ततश्च।।3**
**शब्दस्वरूपां स्तुतिरूपरूपा-**
**मर्थस्वरूपां विषयं स्तुतेस्त्वाम्।**
**शब्दार्थरूपाञ्च जगत्स्वरूपाम्,**
**शब्दैरवर्ण्यां प्रणमामि पुण्याम्।।**

अत्र अनयोः उभयोः श्लोकयोः महाकविः शब्दार्थसम्बन्धस्य नित्यत्वं प्रतिपादयति।

शोधार्थी - ज.रा.रा.सं.वि.वि., जयपुरम्

1 करणीचरितामृतम् 15/6
2. करणीचरितामृतम् 16/34
3. करणीचरितामृतम् 16/36

हार्दिक शुभकामनाओं सहित :-

राष्ट्रीय विचारों के लिए पढ़ें

पाञ्चजन्य Organiser

हमारी विशेषताएं

- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online through our **Websites: www.panchjanya.com, www.organiser.org**

**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**

विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... **$ 60**

**Reach millions of consumers through our weeklies**

**भारत प्रकाशन (दिल्ली) लि.**

2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com

दूरभाषः 011-47642000 से 30 फैक्सः 011-47642015 E-mail: circ@pbdl.in

# वेदेषु वास्तुविद्यास्वरूपम्

❑ मेघा शर्मा

वेदे अनेकेषु मन्त्रेषु गृह-गृहस्थगार्हपत्यविषयकं वर्णनं द्रष्टुं शक्यते।

**वयमु त्वा गृहपते जनानाम्, अग्ने अकर्म समिधावृहन्तम्।**
**अस्थूरिनो गार्हपत्यानि सन्तु, तिग्मेन नस्तेजसा संशिशधि।।**

गृहस्थानां यज्ञ एव धर्मः। अनेन मनुष्यः तेजसम्पन्नो भवति। ऋग्वेदे न केवलं गृहस्य परिवारस्य वा वर्णनं कृतं वर्तते, अपितु वास्तोस्पतिः गृहदेवतायाः वर्णनमपि कृतं वर्तते। गृहदेवतायाः कृपाप्रसादेन गृहे सुखशान्तिः धनसमृद्धिर्जायते। वस्तुतः देवेषु वास्तुदेवतायाः एव गृहदेवतारूपेण वर्णनं लभ्यते। (ऋग्वेदस्य VII 54, 1-3) तमे सूक्ते मनुष्याणां पशूनाञ्च कल्याणाय वास्तुदेवा समृद्धिं ददाति। रोगान् दूरीकरोति। पापान् हरति। क्वचिद् वेदेषु शिल्पकाररूपेण वास्तुदेवतायाः वर्णनमस्ति।

एवं स्पष्टं भवति यत् वास्तुदेवता एव हि गृहदेवता रूपेण प्रसिद्धाऽस्ति। स गृहस्य कल्याणाय तिष्ठति। गृहस्य निर्माणे ग्राम-दिशा-भूमि-नक्षत्र-लाभ-व्ययलग्नाशानां तथा शल्यशोधनं च कार्यं बुध-शुक्र-सूर्य चन्द्रग्रहाणाम् उच्चस्थाने बलयुक्ते जाते सति गृहस्य निर्माणकार्यं करणीयम्।

**गुरुशुक्रार्कचन्द्रेषु स्वोच्चादिबलादिषु।**
**मास-कक्षादिशुद्धिञ्च वीक्ष्याथ व्ययमांशकान्।।**

सामवेदस्य तृतीयाध्याये गृहाणां पालकरूपेण वर्णनमस्ति। वास्तुपुरुषः एव गृहस्याधारभूतस्तम्भः स कवचतुल्यमेव। एतस्मिन् सूक्ते वास्तुपुरुषस्य समृद्धि-प्रदानत्वेन महत्वं वर्णितं वर्तते।

**वास्तोष्पते ध्रुवा स्थूणां सत्रं सोम्याम्।**
**द्रप्सः पुरां मेत्ता शश्वतीनामिन्द्रो मुनीनां सखा।।**

अथर्ववेदे गृहबलं, द्वारशुद्धिः ग्रामानुकूल्यम्-

**स्वनामराशेर्यदराशि द्विशारांकेशदिङ्गतः।**
**सङ्ग्रामः शुभदः स्वत्वशुभः स्यात्ततोऽन्यथा।।**

गृहनिर्माणाय शल्यशोधनमप्यतीवावश्यकम्। शल्यशोधनादनन्तरं गृहजातकविचारः, काकिणीविचारः करणीयः। वास्तुविधानुसारेण गृहवापीकूपतडागादीनां निर्माणविषये वेदेषु पर्याप्तविवेचनमस्ति। गृहनिर्माणाय 'वास्तु' इत्यस्येव प्रयोगः वेदकाले आसीत्। ऋग्वेदे 1, 15, 4.6, 8, 250, 5 तम सूक्ते अथर्ववेदे 1.108.1 तमे सूक्ते गृहदेवतारूपेण वास्तुदेवतायाः वर्णनं कृतं वर्तते। वैदिकयुगे वास्तुशास्त्रस्य महत्वपूर्णस्थानमासीत्। नमः वास्तव्याय च वास्तूपाय च। शुक्लयजुर्वेदे रूद्राष्टाध्यायी इत्यस्मिन् अध्याये।

भारतीयस्थापत्यं यज्ञीयकर्मपरम्परायाः एकं धार्मिकं स्वरूपमस्ति। इयं वास्तुविधा वैदिकवाङ्मये तन्त्रविद्यया सह सम्बन्धिता अस्ति। ऋग्वेदस्य दशममण्डले 121-5 तथा 173-4 तमे सूक्ते अस्य पर्याप्तं निदर्शनमस्ति। वास्तुचक्रस्य निर्माणात्प्राक् भू-परीक्षा आवश्यकी। अस्यां परीक्षायां भूकर्षणम् अंकुशरोपणम् एवं समीकरणं वैदिकीव्यवस्थायाः महत्वपूर्णविकासक्रमः अस्ति। प्रासादस्य निर्माणे भूमेः समीकरणं, भूमौ अंकुशारोपणं

वास्तुशास्त्रस्य महत्वपूर्णमङ्गमासीत्। वस्तुतः वास्तु-पुरुषः अथवा वास्तोष्पतिः प्राचीनवैदिकदेवताया एकं स्वरूपम्। प्रजापति रूद्र एव वास्तुपुरुषस्य जन्मदाता। वास्तोष्पतिः अथवा गृहपतिः तस्य अपरं नाम। वेदेषु वास्तुपुरुषोऽयं यत्र विभिन्नानां रोगाणां नाशं करोति, अयं सोमसदृशः वर्णितः कुत्राप्ययं त्वष्ट्रा सह साम्यं भजते, यत्र कुत्रापि इन्द्रेण सह साम्यं भजते। ऋग्वेदस्य दशममण्डले अस्य बहु महत्वपूर्णं स्थानं वर्तते।

अथर्ववेदे गृहनिर्माणस्य उपमितां परिमितामिति शब्दस्य प्रयोगः वर्णितः दृश्यते।

**उपमितां प्रतिमितामथो परिमितामुतः।**
**शालाया विश्ववारायाः नद्धामि विचृतामसि।।**

प्रतिमितामित्युक्ते एकस्मिन् द्वारसमक्षं द्वितीयस्य द्वारस्य निर्माणं करणीयम्। परिमितामित्युक्ते चतुष्कोणेषु समानरूपेण विभज्य गृहस्य निर्माणं करणीयम्। येन विश्ववारायाः अर्थात् गृहस्य सर्वेषु चतुष्कोणेषु वायुः गृहे प्रसरेत्। चृतामसि इत्युक्ते शिल्पिनः वास्तुविदः यथा कथयन्ति तथैव गृहस्य निर्माणं करणीयम्। येन गृहस्थाः सुखिनो भवन्तु।

अथर्ववेदस्य अन्यस्मिन् मन्त्रे वास्तुविषये उक्तं-

**विर्धहर्ममग्निशालं पत्नीनां सदनं सदः।**
**सदो देवानामसि देवि शाले।।**

वास्तुशास्त्रस्य यथा वेदेषु क्रमशः विकास दृश्यते तथैव ब्राह्मणारण्यकोपनिषदि संहितासूत्रग्रन्थेष्वपि परम्पराया विकासः द्रष्टुं शक्यते।

भृगुसंहितायां लिखिते च एतस्मिन् श्लोके-

**नानाविधानां वस्तूनां यन्त्राणां कल्पसम्पदाम्।**
**धातूनां साधनानाञ्च वास्तूनां शिल्पसंहिताम्।।**

अथर्ववेदादारभ्य ब्राह्मणारण्यकोपनिषदादिग्रन्थेषु संहिताया तथा सूत्रग्रन्थेषु शिल्पशास्त्रस्य पर्याप्तनिदर्शन-मस्ति। शिल्पादिदैवम् इत्युक्ते शिल्पशास्त्रज्ञानां ऋषीणामेकं मण्डलम्। षोडशतापिनीविद्यायां वास्तु-विद्यायाः महत्वपूर्णं स्थानमासीत्। ते आथर्वणः दैवशिल्पः प्रासादशिल्प-नगरशिल्प-दुर्गशिल्प-धातु-करण-शिल्पलेखशिल्पादिविषये निपुणाः भवन्ति। अनेन स्पष्टं यत् एतस्मिन् मण्डले काश्यपस्य काश्यप-शिल्पस्य महत्त्वपूर्णं श्रेष्ठञ्च स्थानमासीत्।

गृह्यसूत्रे च अथर्ववेदसप्तमकाण्डे नवमानुवाके तृतीये सूक्ते उक्तं-

**''वास्तु हि तद्यज्ञस्य यद् घृतेषु हविषु इति''**

यः वास्तुविद्यां जानाति शिल्पज्ञानं जानाति, सः प्रतिमानां निर्माणं कर्तुं शक्नोति। वास्तुदेवता एव वास्तुपुरुषः वास्तोष्पतिः गृहपतिः इत्येतानि सर्वाणि नामानि वेदेषु सूत्रग्रन्थेषु ब्राह्मणादिषु वर्णितानि दृश्यन्ते। यदि वयं वास्तुमण्डलं पश्यामः चेत् तत्र एते सर्वे देवाः प्रजापतिः सोमः, अग्निः, धाता, इन्द्रः, रुद्रादयः गृहपतिरूपेण प्रतिष्ठापिता सन्ति। वैदिकयुगादेव वेदिकानिर्माणं, यज्ञकुण्डनिर्माणतः आरभ्य इयम् अद्यावधि भव्यप्रासादनिर्माणपर्यन्तम् इयं परम्परा अक्षुणा दृश्यते। वेदिकायाः निर्माणे द्विशतम् इष्टिकायाः आवश्यकता भवति। इष्टिकाकर्म वेदकाले कथं विकसितमासीत् इति द्रष्टुं शक्यते। मोहनजोदडो तथा हडप्पा-उत्खनने सभाभवनं, मण्डपभवनं, स्नानागारा-

दीनां, यावत्सुन्दरं निर्माणमासीत् तावद्अधुनापि न लभ्यते। ऋग्वेदे विभिन्नायाम् ऋचायां सहस्रस्तम्भसभा-भवनादीनां वर्णनं दरीदृश्यते। वेदानां माध्यनेन आरण्यकोपनिषदब्राह्मणादिग्रन्थानामवलोकनेनेदं सिद्धं भवति यत् वास्तोष्पतिः तथा विश्वकर्माआर्यवास्तु-कलायाः सर्वप्राचीनः स्थपतिः, आनार्याणां मयः प्रथमो स्थपतिः आसीत्। वास्तुविद्यायाः अध्ययने गृह्यसूत्राणि प्रधानप्रमाणं भजन्ते। गृह्यसूत्रेषु विद्यमानं वास्तुविषयकं विवरणम् ऐतिहासिकं महत्वं भजते। देवलस्मृतौ गृहस्थानां विभागद्वयं वर्णितं दृश्यते यायावरः शालीनश्च।

आश्वालायनगोभिलादिगृह्यसूत्रेषु भूमिपरीक्षणं भूमेः प्रकारः सविस्तृतं द्रष्टुं शक्यते। बौधायनजैमिनीयादिषु गृह्यसूत्रेषु केवलं वास्तुशमनं वास्तुशान्तिविषयकं विवरणं प्राप्यते। कोषीतकि-हिरण्यकेशीयसूत्रयोर्भूमि-परीक्षणं विहाय आगारकरणं शालाकर्म वा वर्णितं दृश्यते।

गृह्यसूत्रकालस्य मुख्यविशेषता एवमस्ति यत् तस्मिन्काले प्राचीनआचार्यैः प्रवसनशीलत्वं परित्यज्य शालीनत्वमङ्गीकृतम्। द्वितीयं वैशिष्ट्यमस्ति यत् वास्तुनिर्माणविषयकाणां मूलस्वरूपाणां सिद्धान्तानां प्रतिपादनं दरीदृश्यते। आधुनिककालेऽपि अस्माभिः भूमिसम्पादने विचार्यते।

**प्रवक्ष्यामि मुनिश्रेष्ठ शृणुष्वैकाग्रमानसः।**
**यदुक्तं शम्भुना प्रोक्तं वास्तुशास्त्रपुरातनम्।।**
**पाराशरः प्राहवैृहद्रथाय वृहद्रथः प्राह च विश्वकर्मणम्।**
**स विश्वकर्मा जगतां हिताय प्रोवाच शास्त्रं बहुभेदयुक्तम्।।**

**शोधकर्त्री**
**राजस्थान-विश्वविद्यालय-संस्कृत-विभागः,**
**जयपुरम्**

**हार्दिक शुभकामनाओं सहित :-**

निर्माता
**ए इन्फ्रास्ट्रक्चर लिमिटेड**
**ए.सी. प्रेशर पाइप्स**
तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ फाइबर सीमेंट की नालीदार चादरें
**छत्त एक, लाभ अनेक**
हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

# ज्योतिर्विज्ञाने सन्तति-वैविध्यम्

❑ धीरजकुमारशर्मा

प्राचीनभारतीयमतानुसारेण ईश्वरकृपया ऋषिभिः प्राप्तं साहित्यं वैदिकसाहित्यम् इति नाम्ना कथ्यते। भारतीयसंस्कृतिः विश्वस्य सर्वासु संस्कृतिषु सर्वोत्कृष्टा वर्तते। अस्माकं भारतदेश जगद्गुरुनाम्ना प्रसिद्धः अस्ति। अस्य अन्तर्गते अस्माकं वेदाः ब्राह्मणग्रन्थाः, आरण्यकग्रन्थाः उपनिषद्-वेदाङ्गानि, षोडशसंस्काराः, रामायणं, महाभारतं, श्रीमद्भगवद्गीता इत्यादि अस्मिन्नेव संस्कृते निहिताः सन्ति। एतेषाम् अवबोधनाय संस्कृतस्य ज्ञानं परमावश्यकं वर्तते यतोहि वेदाः सृष्टे आधाराः सन्ति। तेषां वेदाङ्गानां संख्या षट् इति-

तेषां नामानि यथा -

शिक्षा, कल्पः, निरूक्तं, छन्दः, व्याकरणं ज्योतिषञ्च। परन्तु अद्यतनीये वैज्ञानिकयुगे ज्योतिर्विज्ञानस्य अथवा ज्योतिषशास्त्रस्य महत्त्वं सर्वेषु देशेषु व्याप्तं वर्तते। दैशिकाः वैदेशिकाश्च तुल्यमेव ज्योतिषशास्त्रे प्रतिपादितानां विषयाणाम् उपयोगिताः सार्थकतायाः आवश्यकतायाश्च महत्त्वं स्वीकुर्वन्ति। यतोहि-

ज्योतिषशास्त्रं वेदस्य चक्षुरस्ति यतोहि ज्योतिषशास्त्रं प्रत्यक्षं शास्त्रमस्ति। यस्य साक्षिणौ चन्द्रार्कौ।

**अप्रत्यक्षाणि शास्त्राणि विवादस्तेषु केवलम्।**
**प्रत्यक्षं ज्योतिषं शास्त्रम्।**
**चन्द्रार्कौ यत्र साक्षिणौ।।**

ज्योतिषशास्त्रस्य अपरं नाम प्रत्यक्षशास्त्रमपि अस्ति। अन्यानि सर्वाण्यपि शास्त्राणि अप्रत्यक्षाणि सन्ति। यतोहि यत्र आयुर्वेदशास्त्रं मानवस्य शारीरिकं व्याधिं मानसिकव्याधिं च दूरीकरणार्थं प्रयतमानं दृश्यते स्म। तत्रैव ज्योतिषशास्त्रं रोगातिरिक्तं मानवस्य सर्वविश्व-कल्याणार्थं सर्वासां स्थितीनां घटनानां च शुभाशुभ-निर्धारणं करोति स्म।

यथा मानवशरीरे नेत्राभावे शरीरस्य अपूर्णता व्यर्थता च भवति यतोहि सः किमपि कार्यं कर्तुं समर्थो न भवति अर्थात् संसारे प्रत्यक्षीकरणं कर्तुम् असमर्थो भवति तथा ज्योतिषशास्त्रस्म् अपि वेदस्य नयनं वर्तते। अर्थात् सर्वेषां शास्त्राणां ज्ञाने सत्यपि ज्योतिषशास्त्रस्य ज्ञानाभावे स किमपि कर्तुं न शक्नोति। यतोहि ज्योतिषशास्त्रे लौकिक-अलौकिक रहस्यानां पूर्णतया विचारः क्रियते यथा धनस्य स्थितिः सन्ततिविचारः, पत्नीनिर्णयः, मन्त्रीपदयोगः अथवा राजसेवा प्राप्ति इत्यादिविषयस्य ज्ञानम् अस्मिन् शास्त्रे समन्वितः अस्ति।

संसारे पुत्रेण विना प्राणिनां सुगतिर्न भवति। पुत्रः पितुः पितॄणां नरकात् रक्षां करोति पुत्रेण विना मनुष्याणां पिण्डदानक्रियायाः जलदानक्रियायाश्च लोपो भवति।

परन्तु प्राचीनकालात् अद्यावधिपर्यन्तम् अर्थात् आधुनिकयुगेऽपि जातकः स्वसन्ततिं प्रति चिन्तितो भवति अर्थात् तस्य मनसि स्वसन्ततेर्विषये अनेका इच्छाः प्रबलाः भवन्ति। एषां समेषां तथ्यानां सारांशं वयं ज्योतिषशास्त्रेण ज्ञातुं शक्नुमः यद् भविष्ये पुत्रः कीदृशः भविष्यति अर्थात् अनेन वयं पुत्रस्य शिक्षास्वास्थ्यादीनां ज्ञानं प्राप्तुं शक्नुमः।

**1. कुलवर्धनयोगः**

यदिसर्वे शुभग्रहाः सूर्यचन्द्रमोभ्यां सह पञ्चमभावे स्युस्तर्हि अयं योगो निर्मीयते।

**2. श्रेष्ठपुत्रवान् शोकरहितयोगः**

यदियस्य मनुष्यस्य जन्मकाले चन्द्रमा पञ्चमभावे उपविष्टः स्यात् शुभग्रहश्च बलवान् स्यात् तर्हि सः प्राणी श्रेष्ठपुत्रवान् शोकरहितश्च भवति।

**3. सुपुत्रवान् योगः**

यस्य मनुष्यस्य जन्मकाले पञ्चमभावस्य स्वामी पञ्चमभावे उपविष्टः स्यात् पञ्चमभावस्थग्रहश्च बलवान् स्यात् चेत् सः प्राणी श्रेष्ठपुत्रवान् श्रेष्ठबुद्धिमान् पुण्याचारकर्ता च भवति।

**4. कुपुत्रयोगः**

(i) पञ्चमेशः यदि षष्ठभावे स्यात् पापग्रहैः युतः दृष्टो वा स्यात् तर्हि अयं योगो भवति।

(ii) पञ्चमभावे राहुः केतुः वा स्यातां तर्हि अयं योगो निर्मीयते।

**5. वंशच्छेत्ता योग –**

(i) यस्य मनुष्यस्य जन्मकाले जन्मलग्ने दशमभावे चन्द्रमा उपविशेत्। यदि सप्तमभावे शुक्र उपविशेत् चतुर्थभावे पापग्रहः उपविशेत् तर्हि सः प्राणी वंशनाशको भवति।

(ii) यदि जन्मलग्ने पञ्चमे अष्टमे च व्ययभवनेषु शुभग्रहाः उपविशेयुः तर्हि अपि सः प्राणी वंशस्य नाशं करोति।

**6. दत्तकपुत्रयोगः**

(i) यदि पञ्चमेशलग्नेशौ दुःस्थानेषु (६/८/१२) शुभग्रहैः दृष्टौ स्यातां तर्हि जातकः दत्तकपुत्रं स्वीकरोति।

(ii) यदि पञ्चमभावे बुधःशनिर्वा स्यातां तर्हि दत्तकपुत्रस्य सम्भावना भवति।

**7. नपुंसकसन्ततेः ज्ञानम्**

(i) यदि विषमराशौ सूर्यः समराशौ च चन्द्रमा स्याताम् तौ च परस्परं दृष्टिनिक्षेपं कुर्यातां तर्हि अयं रोगो भवति।

(ii) यदि समराश्यौ सूर्यः विषमराश्यौ मङ्गलः स्यात् एवं परस्परं पश्यति स्त् तर्हि नपुसंकयोगो भवति।

**8. मूकशिशुः**

(i) वृषे चन्द्रमा स्यात् सः च पापग्रहः स्यात् चेत् उक्तयोगेषु उत्पन्नः पुरुषः मूको भविष्यति।

(ii) त्रिके ६/८/१२) धनेशः स्यात् सः च बृहस्पतिना युक्तः स्यात्।

**9. दन्तयुक्तसन्ततिः**

(i) शनिमङ्गलौ मिथुनकन्याराश्यो भूत्वा मिथुन-कन्यानवांशयोः स्यातां चेत् एतादृशस्य बालकस्य जन्मतः दन्ताः भवन्ति।

**10. कूबडयुक्तसन्ततिः**

(i) कर्कराशेः चन्द्रमा लग्ने भूत्वा तस्मिन् शनिमङ्गलयोः दृष्टिः स्यात् चेत् एतादृशे योगे जातकः कूबडयुक्तः भवति।

**11. पंगु सन्ततिः**

(i) मीनलग्ने शनिचन्द्रमसोः आधानलग्नदृष्टिः स्यात् चेत् जातकः पङ्गुः भवति।

(ii) पापग्रहेण युक्तौ शनिचन्द्रौ नवमपञ्चमस्थाने स्थितौ भवेताम्।

**12. वामन संततिः**

(i) सिंहे सूर्यशुक्रौ स्यातां दशमे च मकरराशिगतः चन्द्रमा स्यात्।

(ii) लग्नेशः स्वराशौ स्थितः भवेत् तच्च शुभग्रहाः दृष्टिनिक्षेपं न कुर्युरचेदयं योगो भवति।

**13. नेत्रहीनयोगः**

(i) यदि चन्द्रःषष्ठे सूर्यः अष्टमे शनिः व्ययस्थाने मङ्गलश्च धनस्थाने स्युः तर्हि जातकः नेत्रहीनो भवति।

(ii) यदि लग्ने ग्रहणसमय स्य सूर्यः स्यात् शनिमङ्गलौ नवमपञ्चमस्थानयोः स्यातां तर्हि जन्मांधो भवति।

**शोधच्छात्रः**
**जे.आर.आर.एस.यू.**

नारी-स्तम्भः

# वदान्या माघपत्नी

❑ डॉ. राजेश्वरीभट्ट

अनुपमकवनकौशलेन अद्यापि लोके प्रशंसनीयस्य शिशुपालवधम् इति बृहन्महाकाव्यस्य प्रणेतुः महाकवेर्माघस्य पत्नी सद्‌गुणानां खनिरासीत्। वैदुष्यदाक्षिण्य-पातिव्रत्यादयो गुणास्तस्या अङ्गभूता आसन्। भोजप्रबन्धेन ज्ञायते यत् कदाचिद् राज्ञो भोजस्यः प्रभूतदानशीलताया विशिष्टं विरूदं श्रुत्वा महाकवि माघो भोजस्य प्रशंसायां स्तुतिपरकं श्लोकमेकं विरच्य सपत्नीको धारानगरीमगच्छत्। कविवरः स्वयं तु नगराद् बहिरेवातिष्ठत्। माघस्य पत्नी नृपस्याज्ञया राजसभायां प्रविश्य माघपण्डितेन विरचितं भोजस्य स्तुतिपरकं श्लोकात्मकं पत्रं नृपस्य हस्ते समर्पितवती। तस्मिन् पत्रे कविवरमाघेन प्रभातवर्णनव्याजेन कर्मफल-पीड़िताना मानवानां दशाया वर्णनं कुर्वता कथितम्-

कुमुदवनमपश्रि श्रीमदम्भोजखण्डं  
त्यजति मुदमुलूकः प्रीतिमाँश्चक्रवाकः  
उदयमहिमरश्मिर्याति शीतांशुरस्तं  
हतविधिनिहतानां ही विचित्रो विपाकः।।

भोजप्रबन्ध 271

कविशिरोमणिना माघेन विरचितेऽस्मिन् श्लोके प्रातःकालस्य वर्णनमाध्यमेन आत्मनः स्तुतिं श्रुत्वा भोजो माघपत्न्यै लक्षत्रयरुप्यकाणि प्रदाय आगामिनि दिवसे माघकवेदर्शनाय तद्‌गृहमात्मन आगमनं समसूचयत्। राज्ञा प्रदत्तं विपुलं द्रव्यमादाय गृहं गच्छन्ती प्रसन्नमना माघपत्नी मध्यमार्गे याचकानां मुखेभ्य आत्मनः स्वामिनः कविकुलकैरवमाघस्य धवलकीर्तिकथां श्रुत्वा द्रविता जाता। ततः सा राज्ञाऽधिगतं सर्वं धनं याचकेभ्यः प्राददात्। गृहमागत्य माघपत्नी मार्गे जातं निखिलमुदन्तं स्वामिने न्यवेदयत्। पत्न्या वचनानि श्रुत्वा तस्या दाक्षिण्येन द्रवितो माघकविर्धन्यमात्मानममन्यत। अचिरमेव माघपत्न्या दानशीलताया वृतान्तं श्रुत्वा अन्येऽपि याचका माघस्य गृहमागताः। तत्र वस्त्रावशेषं माघं दृष्ट्वा ते यथाऽऽगताः तथैव गमनायोद्यता जाताः। इदं दृष्ट्वा भावभरितो माघ आत्मनो दारिद्र्यं धिक्कुर्वन् दारिद्र्याग्निसंतापाद् याचकानां आशाभङ्गेन जातं संतापं घोरं कष्टकरञ्च मन्यमानः स्वपत्नीमब्रवीत्-

दारिद्र्यानल सन्तापः शान्तः संतोषवारिणा।  
याचकाशाविघातान्तर्दाहः केनोपशाम्यति।।

भोजप्रबन्ध 282

कविवरमाघस्य अन्तर्वेदनां विज्ञाय सर्वे याचकाः स्व स्व स्थानं प्रतिनिवृत्ताः। भग्नमनोरथेषु याचकेषु प्रतिनिवृत्तेषु कविमाघः स्व जीवनं भर्त्सयन् कथयति।

व्रजत व्रजत प्राणा अर्थिभिर्व्यर्थतां गतैः।  
पश्चादपि च गन्तव्यं क्व सोऽर्थः पुनरीदृशः।।

भोजप्रबन्ध 283

एवं विलपन्माघपण्डितः प्राणानत्यजत्। दिवंगते भर्तरि दानशीला पतिप्राणा अधिगतपरमार्था माघपत्नी भृशं क्रन्दन्ती आत्मनो दुरवस्थां धिक्कुर्वन्ती कथयति-

सेवन्ते स्म गृहं यस्य दासवद् भू भुजः सदा।  
स्वभायाः सहायोऽयं म्रियते माघपण्डितः।

भोजप्रबन्ध 284

कविवरमाघस्य स्वर्लोकगमनस्य शोकसमाचारं श्रुत्वा विप्रशतैरावृत्तो राजा भोजो रात्रावेव माघस्य निवासस्थलमागच्छत्। माघपत्न्या निवेदनेन भोजो मृतदेहं नर्मदातीरं नीत्वा वैदिकविधिना कवेरौर्ध्वदैहिकं कर्म सम्पादितवान्। अनन्तरं पतिप्राणा माघपत्नी स्वयमपि तत्रैव वह्नौ प्रविष्टा जाता। माघ-पत्न्याः दानशीलता पतिभक्तिः अनुपमत्यागश्च युगयुगेम्यः स्मरणीयोऽस्ति।

## हिन्दी अनुवाद

अनुपम कवित्वकौशल से आज भी लोक में प्रशंसनीय 'शिशुपालवधम्' नामक वृहद् महाकाव्य के रचयिता महाकवि माघ की पत्नी सद्गुणों की खान थी। विद्वत्ता, उदारता एवं पतिपरायणता आदि गुण उनके सहज गुण थे। 'भोजप्रबन्ध' नामक पुस्तक से ज्ञात होता है कि किसी समय राजा भोज की विशिष्ट दानशीलता की प्रशंसा सुनकर 'महाकविमाघ' भोज राजा की प्रशंसा में स्तुति परक श्लोक की रचनाकर अपनी पत्नी के साथ धारा नगरी गये। कविवर माघ स्वयं तो नगर के बाहर ही रुक गये तथा कवि माघ की पत्नी ने राजाभोज की आज्ञा प्राप्त कर राजभवन में प्रवेश कर माघ पण्डित द्वारा रचित, राजाभोज का स्तुतिपरक, श्लोकात्मक पत्र, राजा के हाथ में दिया। उस पत्र में कविशिरोमणि माघ के प्रभातवर्णन के माध्यम से कर्मपीड़ित मानवों की दशा का वर्णन करते हुए लिखा था– 'हे राजन्!' सूर्योदय से कुमुद पुष्पों की प्रभा नष्ट हो गई और कमल के पुष्पों की शोभा बढ़ गई, उल्लुओं का आनन्द लुप्त हो गया तथा चकवा-चकवी का प्रेम बढ़ गया, सूर्य उदय होता है, चन्द्र अस्त होता है, इसी प्रकार दुर्दैव से ग्रस्त लोगों के कर्मफलों की दशा विचित्र होती है।

**भोज प्रबन्ध 271**

श्रेष्ठकवि माघ के द्वारा विरचित इस श्लोक में प्रातःकाल के वर्णन के बहाने अपनी स्तुति सुनकर भोज ने माघ की पत्नी को तीन लाख रुपये भेंट कर, दूसरे दिन कवि शिरोमणि माघ के दर्शन के लिए उनके घर आने के लिए आश्वासन दिया। राजा के द्वारा दिये हुए धन को ग्रहण कर, घर जाती हुई, प्रसन्न माघ पत्नी ने मार्ग में याचकों के मुख से अपने पति, कविकुल की कीर्ति बठाने वाले, माघ की कीर्तिकौमुदी कथा को सुनकर राजाभोज द्वारा दिये गए समस्त धन को याचकों को दे दिया। घर पहुँच कर माघ की पत्नी ने मार्ग में घटित समस्त वृतान्त को अपने पति से कहा। अपनी पत्नी की अनपुम दानशीलता का वृतान्त सुनकर उनकी उदारता से द्रवित माघकवि ने अपने को धन्य माना। शीघ्र ही माघपत्नी की दानशीलता की चर्चा सुनकर अन्य याचकगण माघ के निवास स्थल पर आगए। वहाँ उन्होंने वस्त्रावशेष माघ को देखा तो वे जैसे आए थे वैसे ही जाने के लिए उद्यत हो गए। यह देखकर अत्यन्त भावुक मन से माघ ने अपनी दरिद्रता को धिक्कारते हुए, दरिद्रता की अग्नि से उत्पन्न संताप की अपेक्षा याचकों की आशा विफल होने से उत्पन्न होने वाले संताप को अधिक कष्टकारक मानते हुए अपनी पत्नी से कहा– दरिद्रता रूपी आग से उत्पन्न होने वाला ताप सन्तोषरूपी जल से शान्त किया जा सकता है किन्तु याचकों की आशाभङ्ग करने से उत्पन्न होने वाला ताप किसी प्रकार भी शान्त नहीं किया जा सकता।

**भोज प्रबन्ध 282**

कविवर माघ की अन्तर्वेदना को जानकर आए हुए समस्त याचक अपने-अपने स्थान पर लौट गए (जिनके मनोरथ निष्फल हो गए उन याचकों के लौट जाने पर कविवर माघ अपने जीवन की भर्त्सना करते हुए कहने लगे– याचकगण यहाँ से निष्फल होकर चले गए अतः हे मेरे प्राण निकल जाओ। अन्त में एक दिन तो तुम्हे जाना ही होगा किन्तु उस समय ऐसा अवसर कहाँ मिलेगा। इस प्रकार विलाप करते हुए माघ पण्डित ने प्राणत्याग कर दिया। अपने पति के दिवंगत हो जाने पर दानशीला, पतिप्राणा परम विदुषी माघ पत्नी ने अपने दुरवस्था की निन्दा करते हुए कहा– ''जिसके घर में नृपतिगण सदैव सेवक के समान सेवारत रहते थे वे माघ, एकमात्र स्त्री ही जिन की सहायक थी आज दिवंगत हो गए।'' भोजप्रबन्ध 284

कविवर माघ के निधन का शोक समाचार सुनकर राजा भोज सौ ब्राह्मणों के साथ वहाँ आए तथा माघ की पत्नी के निवेदन पर माघ की मृत देह को नर्मदा नदी के तीर पर ले जाकर वैदिक विधि से माघकवि का और्ध्वदैहिक कर्म सम्पादित किया तदनन्तर माघ की पतिव्रता पत्नी वहीं पर अग्नि में प्रविष्ट हो गई। माघपत्नी की अनन्य पति- भक्ति, दानशीलता एवं त्याग लोक में युग युग तक स्मरणीय है।

–सी-276, भाभामार्ग, तिलकनगर, जयपुर

आयुर्वेद-स्तम्भः

# हरिद्रा कफनाशिनी

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**वर्तते हि कालेऽस्मिन्नतिशैत्यमुत्तरभारतवर्षे। कारणादस्मात् कफसञ्चयेन प्रारम्भिकरूपेण जायमानानां रोगाणां कष्टोऽथवा पूर्वत एव श्वासशीत-पित्तशोषत्वग्दोषकासादिरोगैः प्रपीडितानां जनानां कष्टो विशेषेणाऽभिवर्धते। अतः जनाः तद-पवारणार्थमथवा तन्निवारणार्थं बहुविधानां विशिष्टानां द्रव्याणां विशिष्टेन विधिना प्रभूत-मात्रायामर्थात् सामान्य-मात्रातोऽधिकमात्रायां सत्यामपि नियतमात्रायां सेवनं निरन्तरमौषधिरूपेण कुर्वन्ति। तेन हि ते न केवलं रोगेभ्यः नवीनेभ्यो विमुक्ता भवन्त्यपितु कृच्छ्रसाध्येभ्यः रोगेभ्योऽपि विमुक्ताः भवन्ति, याप्यास्तु रोगाः न विशेषेण पीडनं कुर्वन्ति। स्वस्थानाञ्च स्वाथ्यरक्षणं जायत एभिः प्रयोगैः।**

इस समय भारतवर्ष के उत्तर में अत्यधिक ठण्ड है। इस कारण से कफ के सञ्चय से प्रारम्भिक रूप से उत्पन्न होने वाले रोगों का कष्ट अथवा पहले से ही श्वास, शीतपित्त (पित्ती), शोष, त्वचा के विकार और कास आदि रोगों से पीड़ित लोगों का कष्ट विशेषरूप से बढ़ जाता है। अतः लोग उससे बचने के लिए अथवा उसको दूर करने के लिए अनेक प्रकार के विशिष्ट द्रव्यों का विशिष्ट विधि से अधिक मात्रा में अर्थात् सामान्य मात्रा से अधिक मात्रा में होते हुए भी नियत मात्रा में औषधि रूप में निरन्तर सेवन करते हैं। उससे वे न केवल नवीन रोगों से मुक्त होते हैं अपितु कृच्छ्रसाध्य रोगों से भी मुक्त होते हैं, याप्य रोग तो (इनके सेवन के कारण) विशेष रूप से पीड़ित नहीं करते हैं और स्वस्थ व्यक्तियों के स्वास्थ्य का रक्षण इन प्रयोगों से हो जाता है।

**क्रमेऽस्मिन् रसायनविधिना सेवनीयानि बहूनि द्रव्याणि सन्ति। तेषु शुण्ठी-यवानी-मेथिका-कुमारिका-बला-ऽश्वगन्धा-हरिद्रादीनि च प्रमुखानि सन्ति। लेखेऽस्मिन् हरिद्रामधिकृत्य केषाञ्चिद् योगानां प्रमुखानाञ्च प्रयोगाणामुल्लेखः क्रियते। यद्यपि प्रारम्भिकरूपेण तु तस्याः परिचयः रसवीर्यविपाक-प्रभाव-गुणादिभिः सह करणीयो वर्तते। किन्तु हरिद्रा विशेषेण कफनाशिनी वर्तते तथा हेमन्तशिशिरौ तु कफसञ्चयात्मकौ वर्तेते। पश्चात्तु वसन्तस्यागमनं भवति। वसन्तस्तु कफप्रकोपकालो वर्तते। तत्रैकः चिकित्सासिद्धान्तो वर्तते यत् 'सञ्चयेऽपहृताः दोषाः लभन्ते नोत्तरा गतिः।' अतः सिद्धान्तमेनमधिकृत्य यदि कस्यचित् कफनाशकस्य द्रव्यस्य प्रयोगः हेमन्ते शिशिरे च क्रियते तदा कफसञ्चय एव न भवति, कफकालानुरूपाणां श्वास-कासादीनामपवारणं निवारणञ्चापि भवति।**

इस क्रम में रसायनविधि से सेवन करने योग्य बहुत से द्रव्य हैं। उनमें सोंठ, अजवायन, मेथी, ग्वारपाठा, खरेंटी, अश्वगन्धा और हरिद्रा आदि प्रमुख हैं। इस लेख में हरिद्रा को ध्यान में रख कर कुछ योगों का और कुछ प्रमुख प्रयोगों का उल्लेख किया जा रहा है। यद्यपि प्रारम्भिक रूप से तो उसका परिचय रस-गुण-वीर्य-विपाक-प्रभावादि के साथ करणीय है। किन्तु हरिद्रा विशेषरूप से कफ का नाश करने वाली है तथा हेमन्त और शिशिर तो कफ का (शरीर में) सञ्चय करने वाले होते हैं। इसके बाद तो वसन्त का आगमन होता है। वसन्त तो कफ के प्रकोप का काल है। उसमें एक चिकित्सा-सिद्धान्त है कि 'सञ्चय काल में अपहृत (दूर) किए गए दोष बाद की गति (प्रकोप) को प्राप्त नहीं होते हैं।' अतः इस सिद्धान्त को ध्यान में रख कर यदि किसी कफनाशक द्रव्य का प्रयोग हेमन्त में और शिशिर में किया जाता है तो कफ का सञ्चय ही नहीं होता है। कफकाल के

अनुरूप (होने के कारण होने वाले) श्वासकासादि का अपवारण (बचाव) और (यदि हो गए हों तो) निवारण भी होता है।

**यदि पूर्वं हरिद्रायाः परिचयात्मकः लेखः मासेऽस्मिन् दीयते तदा कफसञ्चयकालस्यातिक्रमणं भविष्यति। लेखेऽस्मिन् रसायनविधिना सेवनीयानां मोदकानामुल्लेखोऽपि परमावश्यको वर्तते। तेषां मोदकानां सेवनं हेमन्ते शिशिरे वा करणीयं वर्तते, यतो हि जाठराग्नेः प्राबल्यं भवति कालेऽस्मिन्। अतः हरिद्रायाः सामान्यः आवश्यकश्च परिचयोऽग्रिमे मासे निश्चितरूपेण भविष्यति। अत्र तु प्रयोगात्मकः लेखः प्राथमिकरूपेण प्रस्तूयते। आभ्यन्तरप्रयोगे तु या हरिद्रा स्थूला भवति तथा छेदे तु यस्याः कुङ्कुमछविर्भवति सा श्रेष्ठा भवति।**

**हरिद्राचूर्णप्रयोगः-**

**ग्रामत्रयपरिमितं हरिद्राचूर्णं गृहीत्वा त्रिगुणात्मके गुडे (नवग्रामे) सम्मिश्र्य भक्षणं कृत्वा गोमूत्रपानं करणीयम्। प्रातः सायं नियमितरूपेणास्य प्रयोगेण श्लीपदस्य दद्रूणां च विनाशनं भवति। विशेषेण तु नवीनयोरनयोः रोगयोः एषः प्रयोगः श्रेयस्करो भवति।**

यदि पहले हल्दी का परिचयात्मक लेख इस महीने में दिया जाता है तो कफ के सञ्चय के काल का तो अतिक्रमण हो जाएगा (निकल जाएगा)। इस लेख में रसायनविधि से सेवन करने योग्य लड्डुओं का उल्लेख भी परमावश्यक है। उन लड्डुओं का सेवन हेमन्त में अथवा शिशिर में करणीय है, क्योंकि इस काल में जाठराग्नि की प्रबलता होता है। इसलिए हरिद्रा का सामान्य और आवश्यक परिचय अगले माह में निश्चित रूप से होगा। यहाँ तो प्रयोगात्मक लेख प्राथमिक रूप से प्रस्तुत किया जा रहा है। आभ्यन्तर प्रयोग में तो जो हल्दी मोटी होती है तथा काटने पर (या फोड़ने पर) तो जिसकी छवि (आभा, अन्दर का रंग) केशर के समान होती है वह श्रेष्ठ होती है।

**हरिद्राचूर्ण-प्रयोग -**

तीन ग्राम की मात्रा में हल्दी के चूर्ण को ले कर तीन गुने (9 ग्राम) गुड़ में मिलाकर खा कर गोमूत्र पीना चाहिए। प्रातः सायं नियमित रूप से इसके प्रयोग से श्लीपद (हाथीपगा फाइलेरिया) का और दाद का विनाश होता है। विशेषरूप से तो इन दोनों रोगों के नवीन होने पर यह प्रयोग श्रेष्ठ होता है (कल्याणकारी होता है)।

- **ग्रामद्वयपरिमितं हरिद्राचूर्णं गृहीत्वा दुग्धे सम्मिश्र्य किञ्चित्कालपर्यन्तं दुग्धमुत्क्वथनीयं, पश्चात्तु कवोष्णस्यास्य दुग्धस्य पानेन कासस्यापनयनं श्वासस्य च प्रशमनं भवति। शीतपित्तेऽपि च सुखद एषः प्रयोगः।**
- **ग्रामैकपरिमितं हरिद्राचूर्णमेकस्मिन्नस्थिविरहिते पिण्डखर्जूरे सम्पूर्य गोलिकामेकां विधाय मुखे निधातव्यमस्य च संचूषणं शनैः शनैः कर्तव्यम्। कण्ठशोषे संशुष्के कासे स्वरभेदे कण्ठघुर्घुरके च विशेषेण लाभप्रदा एषा गुडिका। सम्पूर्णे दिवसे पञ्चसंख्यात्मकानामेतादृग्विधानां गुडिकानां प्रयोगः साधु भवति।**
- **हरिद्रादिचूर्णम्-**

**समभागानां हरिद्रा-मरिच-रास्ना-कणा-शटीत्येतेषां पञ्चद्रव्याणां सूक्ष्मं चूर्णं गृहीत्वा तन्मात्रकं समभागात्मकमेव द्राक्षाकल्कं गुडञ्च पृथक्-पृथक्रूपेण गृहीत्वा सर्वं द्रव्यं सम्यग्विमिश्र्य काचपात्रे संरक्षणीयमस्य चूर्णस्य पञ्चग्रामात्मिकां मात्रां गृहीत्वा 10 मि.लि. परिमाणात्मके सर्षपतैले विमिश्र्य शनैः शनैः लेहयेत्। अनेन श्वासरोगस्य प्रशमनं भवति। भैषज्यरत्नावलीनामके ग्रन्थ आचार्यः कथयति यत् 'जह्यात्तैलेन विलिहन् श्वासान् प्राणहरानपि।'**

– **ग्रामद्वयपरिमितं हरिद्राचूर्णं गृहीत्वा दश-ग्रामात्मके क्षौद्रे पञ्च मि.लि. परिमाणात्मके चार्द्रकस्वरसे सम्मिश्र्य लेहयेत्। अनेन हिक्का-श्वास-कासानां शमनं भवति। कफस्य च सम्यक्रूपेण बहिः निःसरणं भवति। कफक्षपणे ह्येषः प्रयोगः श्रेष्ठो वर्तते।**

– **दशग्रामपरिमितामार्द्रां हरिद्रां गृहीत्वार्द्रकमपि च तन्मात्रकमेव गृहीत्वा सम्यक् पिष्टिं विधाय किञ्चिन्मात्रके घृते सम्यक् भर्जनं विधाय विंशति-ग्रामपरिमाणात्मकं गुडं प्रक्षिप्य लेहवत् कृत्वा लेहयेत्। एषा ह्येका मात्रा। अस्य प्रयोगस्त्वेकमास-पर्यन्तं प्रातःसायं करणीयः। शुष्के कासे श्वासे च लाभप्रद एषः प्रयोगः।**

– दो ग्राम हल्दी के चूर्ण को लेकर दूध में मिलाकर दूध को कुछ देर तक उबालना चाहिए, बाद में तो इस दूध को कुछ गर्म पीने से खाँसी दूर होती है और श्वास-रोग का भी शमन होता है। शीतपित्त में भी यह प्रयोग सुखदायी होता है।

– एक ग्राम हरिद्राचूर्ण को ले कर गुठली निकाले हुए एक पिण्डखर्जूर में इसको भरकर एक गोली बना कर मुख में रखना चाहिए और इसको धीरे-धीरे चूसना चाहिए। कण्ठशोष में, सूखी खाँसी में, स्वरभेद में, कण्ठ में घुर्घुर होने पर यह गोली विशेष लाभदायक है। पूरे दिन में इस तरह की पाँच गोलियों का प्रयोग ठीक रहता है।

**हरिद्रादिचूर्ण-**

हरिद्रा, मरिच, रास्ना, पिप्पली और कचूर इनको समान मात्रा में लेकर सूक्ष्म चूर्ण करके इनके एक भाग की मात्रा के बराबर ही द्राक्षा का कल्क और उतना ही (एक भाग जितना) गुड़ लेकर सभी द्रव्यों को अच्छी तरह मिलाकर काच के पात्र में रखना चाहिए। इस चूर्ण की पाँच ग्राम मात्रा लेकर 10 मि.लि. सरसों के तैल में मिलाकर धीरे-धीरे चटाना चाहिए। इससे श्वास रोग शान्त होता है। भैषज्यरत्नावली नामक ग्रन्थ में आचार्य कहते हैं कि - 'तैल से (इस चूर्ण को) चाटते हुए के प्राणहर श्वास-रोगों को भी यह दूर करता है।'

– दो ग्राम हरिद्राचूर्ण को लेकर दश ग्राम शहद और पाँच ग्राम अदरख के स्वरस में मिलाकर चटाना चाहिए। इससे हिचकी, श्वास और कास शान्त होता है और कफ ठीक तरह से निकल जाता है। कफ को नष्ट करने में यह प्रयोग श्रेष्ठ है।

– दश ग्राम की मात्रा में ताजा (गीली, कच्ची) हल्दी एवं दश ग्राम ही ताजा अदरख लेकर अच्छी प्रकार से पिष्टि (चटनी) बना कर थोडे से घी में अच्छी तरह भूनकर 20 ग्राम गुड़ डालकर अवलेह की तरह बना कर चटाना चाहिए। यह एक मात्रा है। इसका प्रयोग एक मास तक सुबह-शाम करना चाहिए। सूखी खाँसी और श्वास रोग में यह प्रयोग लाभप्रद है।

**रजन्यादिचूर्णम्-**

**रजनी सरलं दारु श्रेयसी बृहतीद्वयं पृश्निपर्णी शताह्वा च माक्षिकसर्पिषा लीढं बालकानां ग्रहणीदीपनं करोति विशेषेण। एतच्चूर्णं ज्वरातीसारपाण्डुघ्नमस्ति। बालानां हितकारीद-मन्येषां जनानां कृतेऽपि हितकारकं वर्तते।**

**हरिद्रादिक्वाथ :-**

**हरिद्राद्वययष्ट्याह्वसिंहीशक्रयवैः कृतः कषायः ज्वरातिसारघ्नः वर्तते।**

**हरिद्राखण्डः-**

**विशिष्टेन विधिना विनिर्मितः हरिद्राखण्डः औषधरूपेणापणे मिलति। एषः खण्डः षड्ग्रामपरिमितायां मात्रायामुष्णोदकेन पयसोष्णेन वा भुक्तः शीतपित्तोदर्दकोठकण्डूपामाविचर्चिकाः विनाशयेत्। कासे श्वासेऽपि च हितकारकः खण्डः पाण्डुशोथोदरकृमीनपि नाशयति। कण्डूनां**

**परमौषधमेषः हरिद्राखण्डः जीर्णज्वरेऽपि हितकारको वर्तते।**

**रजन्यादिचूर्ण-**

हल्दी, सरलकाष्ठ (धूपवृक्ष), देवदारु, गजपीपल, बडी कटेरी, छोटी कटेरी, पृश्निपर्णी, सौंफ को (इन सब को समभाग लेकर इनका चूर्ण बना कर इस चूर्ण को) शहद और घी मिलाकर उसके साथ चाटने पर बालकों की ग्रहणी को, विशेषरूप से दीप्त करता है। यह चूर्ण ज्वर, अतीसार और पाण्डु को नष्ट करने वाला होता है। बालकों के हितकारी यह चूर्ण अन्य लोगों के लिए भी हितकारक है।

**हरिद्रादि क्वाथ -**

हरिद्रा, दारुहरिद्रा, मुलहठी, अडूसा और इन्द्रजौ (इनको समभाग लेकर) इनसे बनाया गया क्वाथ ज्वर और अतीसार को नष्ट करने वाला होता है।

**हरिद्राखण्ड -**

विशिष्ट विधि से निर्मित हरिद्राखण्ड बाजार में औषध रूप में मिलता है। यह हरिद्राखण्ड 6 ग्राम की मात्रा में गर्म जल से या गर्म दूध से खाया हुआ शीतपित्त, उदर्द (ददोड़े), कोठ (चकत्ते), खुजली, पामा और विचर्चिका को नष्ट करता है (ये सभी त्वचा में होने वाली विकृतियाँ है)। कास में और श्वास में भी हितकारक यह खण्ड पाण्डु, शोथ और उदरकृमियों को नष्ट करता है। खुजली की यह हरिद्राखण्ड श्रेष्ठ औषध है और यह जीर्णज्वर में भी हितकारक है।

**हरिद्रामोदकाः-**

**250 ग्राम परिमितं हरिद्राचूर्णं गृहीत्वा 250 ग्राम परिमिते घृते किञ्चिन्मात्रं भर्जनं मन्दाग्निमाध्यमेन करणीयम्। पृथक्रूपेण च एककिलोग्राम-परिमितस्य गोधूमचूर्णस्य भर्जनं 500 ग्रामपरिमिते घृते करणीयम्। बब्बूलनिर्यासस्य 100 ग्राम-परिमितस्य चापि भर्जनं गोघृते करणीयम्। सर्वं सम्यग् विमिश्र्य सार्धैककिलोग्राम-परिमितस्य सितोपलाचूर्णस्य मिश्रणमपि तत्र करणीयम्। मरिचस्य स्वस्वरूप एव 25 ग्राम परिमितस्य प्रक्षेपोऽपि समुचितः। त्वगेलापत्राणां सम्मिलितानां प्रक्षेपोऽपि समुचितः। त्वगेलापत्राणां सम्मिलितानां सुसूक्ष्मं चूर्णं 20 ग्रामपरिमितमेव प्रक्षेपणीयम्। पुनश्च सम्मिलितानां समेषां मोदकाः कार्याः त्रिंशत्संख्या-याम्। प्रातः सायमें कैकस्य मोदकस्य भक्षणं पञ्च-दशदिनपर्यन्तं पथ्यपूर्वकं करणीयम्। कालेऽस्मिन् समुचितस्योष्णस्य दुग्धस्य पानमुचितम्। अस्य प्रयोगेण श्वास-कास-शीतपित्तोदर्दकण्ड्वादीनां निवारणं भवति।**

**हरिद्रामोदक -**

250 ग्राम हरिद्राचूर्ण को लेकर 250 ग्रा. घी में थोड़ा मन्दाग्नि के माध्यम से भून ले। अलग से एक किलो गेहूँ के चूर्ण को (आटे को) 500 ग्रा. घी में भून लें (सेक लें)। बबूल का गोंद 100 ग्राम लेकर उसे भी गोघृत में भून लें। सबको अच्छी प्रकार से मिलाकर डेढ किलो मिश्री का चूर्ण भी उसमें मिलाना चाहिए। साबुत कालीमिर्च 25 ग्रा. की मात्रा में इसमें डालना ठीक है। दालचीनी, इलायची और तेजपत्र का सूक्ष्म चूर्ण इसमें 20 ग्रा. की मात्रा में ही डालना चाहिए। फिर इस मिले हुए सबके 30 लड्डू बना लेने चाहिए। सुबह-शाम एक-एक लड्डू पथ्यपूर्वक 15 दिन तक खाना चाहिए। इस समय उपयुक्त मात्रा में गर्म दूध पीना ठीक रहता है। इसके प्रयोग से श्वास, कास, शीतपित्त, उदर्द और खुजली आदि का निवारण होता है।

**80, सेनापति हाउस के पीछे, प्रेमनगर,**
**झोटवाड़ा, जयपुर**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17




स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,